ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥
एह्येहि हेरम्ब महेशपुत्र समस्तविघ्नौघविनाशदक्ष। माङ्गल्यपूजाप्रथमप्रधान गृहाण पूजां भगवन् नमस्ते ॥

---

* यहाँ पूजनके मन्त्र लिखे गये हैं, यदि मरणासन्नकी दृष्टिसे पूजनमें शीघ्रता करनी हो तो केवल नाममन्त्र—'**श्रीगणेशाम्बिकाभ्यां नमः, पुष्पं समर्पयामि**'—इस प्रकार बोलकर अन्य पूजन-सामग्री चढ़ायी जा सकती है अथवा श्रीगणेशाम्बिका-स्मरण तथा पंचोपचारपूजन भी कर सकते हैं।

सिद्धिबुद्धिसहिताय गणपतये नमः गणपतिमावाहयामि,स्थापयामि, पूजयामि च।

हाथके अक्षत गणेशजीपर चढ़ा दे। फिर अक्षत लेकर गणेशजीकी दाहिनी ओर गौरीजीका आवाहन करे—

भगवती गौरीका आवाहन—

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥
हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम्।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम्॥

गौर्यै नमः, गौरीमावाहयामि, स्थापयामि, पूजयामि च।

प्रतिष्ठा—

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु।
विश्वे देवास इह मादयन्तामो३म्प्रतिष्ठ॥
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

श्रीगणेशाम्बिके सुप्रतिष्ठिते वरदे भवेताम्। प्रतिष्ठापूर्वकम् आसनार्थे अक्षतान् समर्पयामि, श्रीगणेशाम्बिकाभ्यां नमः। आसनके लिये अक्षत समर्पित करे।

पाद्य, अर्घ्य, आचमनीय, स्नानीय, पुनराचमनीय—एतानि पाद्यार्घ्याचमनीय-स्नानीयपुनराचमनीयानि समर्पयामि। श्रीगणेशाम्बिकाभ्यां नमः। (इतना कहकर जल चढ़ा दे।)

पंचामृतस्नान—

पंचामृतं मयानीतं पयो दधि घृतं मधु।
शर्करया समायुक्तं स्नानार्थं प्रतिगृह्यताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, पंचामृतस्नानं समर्पयामि। (पंचामृतसे स्नान कराये।)

शुद्धोदकस्नान—

गङ्गा च यमुना चैव गोदावरी सरस्वती।
नर्मदा सिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, शुद्धोदकस्नानं समर्पयामि। (शुद्ध जलसे स्नान कराये।)

आचमन—शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

वस्त्र—

शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम्।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे॥

श्रीगणेशाम्बिकाभ्यां नमः, वस्त्रं समर्पयामि। (वस्त्र समर्पित करे।)

आचमन—वस्त्रान्ते आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

यज्ञोपवीत—

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

श्रीगणेशाम्बिकाभ्यां नमः, यज्ञोपवीतं समर्पयामि। (यज्ञोपवीत समर्पित करे।)

आचमन—यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

उपवस्त्र—श्रीगणेशाम्बिकाभ्यां नमः, उपवस्त्रं (उपवस्त्राभावे रक्तसूत्रं) समर्पयामि। (उपवस्त्र समर्पित करे।)

आचमन—उपवस्त्रान्ते आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

चन्दन—

ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः।
त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत॥
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, चन्दनानुलेपनं समर्पयामि। (चन्दन अर्पित करे।)

अक्षत—

अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वर॥

श्रीगणेशाम्बिकाभ्यां नमः, अक्षतान् समर्पयामि। (अक्षत चढ़ाये।)

पुष्पमाला—

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो।
मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, पुष्पमालां समर्पयामि। (पुष्पमाला समर्पित करे।)

दूर्वा—

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवा नो दूर्वे प्र तनु सहस्रेण शतेन च॥

श्रीगणेशाम्बिकाभ्यां नमः, दूर्वाङ्कुरान् समर्पयामि। (दूर्वांकुर चढ़ाये।)

सिन्दूर—

सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्धनम्।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, सिन्दूरं समर्पयामि। (सिन्दूर अर्पित करे।)

अबीर-गुलाल आदि नाना परिमल द्रव्य—

अबीरं च गुलालं च हरिद्रादिसमन्वितम्।
नानापरिमलं द्रव्यं गृहाण परमेश्वर॥

श्रीगणेशाम्बिकाभ्यां नमः, नानापरिमलद्रव्याणि समर्पयामि। (अबीर-गुलाल आदि चढ़ाये।)

सुगन्धिद्रव्य—

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥

श्रीगणेशाम्बिकाभ्यां नमः, सुगन्धिद्रव्यं समर्पयामि। (सुगन्धित द्रव्य समर्पित करे।)

धूप—

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, धूपमाघ्रापयामि। (धूप दिखाये।)

दीप—

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥

श्रीगणेशाम्बिकाभ्यां नमः, दीपं दर्शयामि। (दीप दिखाये।)

हस्तप्रक्षालन—'ॐ हृषीकेशाय नमः' कहकर हाथ धो ले।

नैवेद्य—नैवेद्यको प्रोक्षित कर गन्ध-पुष्पसे आच्छादित करे। तदनन्तर जलसे चतुष्कोण घेरा लगाकर भगवान्‌के आगे रखे।

ॐ नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन्॥
शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च।
आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, नैवेद्यं निवेदयामि। (नैवेद्य निवेदित करे।)

ॐ अमृतोपस्तरणमसि स्वाहा। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ व्यानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ समानाय स्वाहा। ॐ अमृतापिधानमसि स्वाहा। (उच्चारण कर तीन आचमनी जल चढ़ाये।) **नैवेद्यान्ते आचमनीयं जलं समर्पयामि।** (जल समर्पित करे।)

ऋतुफल—

इदं फलं मया देव स्थापितं पुरतस्तव।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥

श्रीगणेशाम्बिकाभ्यां नमः, ऋतुफलानि समर्पयामि। (ऋतुफल अर्पित करे।)

उत्तरापोऽशन—उत्तरापोऽशनार्थे जलं समर्पयामि। गणेशाम्बिकाभ्यां नमः। (जल दे।)

करोद्वर्तन—

चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम्।
करोद्वर्तनकं देव गृहाण परमेश्वर॥

श्रीगणेशाम्बिकाभ्यां नमः, करोद्वर्तनकं चन्दनं समर्पयामि। (मलयचन्दन समर्पित करे।)

ताम्बूल—

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, मुखवासार्थं एलालवंगपूगीफलसहितं ताम्बूलं समर्पयामि। (इलायची, लौंग और सुपारीके साथ ताम्बूल अर्पित करे।)

दक्षिणा—

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

श्रीगणेशाम्बिकाभ्यां नमः, कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि। (द्रव्य-दक्षिणा समर्पित करे।)

आरती—

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

श्रीगणेशाम्बिकाभ्यां नमः, आरार्तिकं समर्पयामि। (कर्पूरकी आरती करे, आरतीके बाद जल गिरा दे।)

पुष्पांजलि—

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥
नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर॥

गणेशाम्बिकाभ्यां नमः, पुष्पाञ्जलिं समर्पयामि। (पुष्पांजलि अर्पित करे।)

प्रदक्षिणा—

यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिणा* पदे पदे॥

श्रीगणेशाम्बिकाभ्यां नमः, प्रदक्षिणां समर्पयामि। (प्रदक्षिणा करे।)

विशेषार्घ—

ताम्रपात्रमें जल, चन्दन, अक्षत, फल, फूल, दूर्वा और दक्षिणा रखकर अर्घपात्रको हाथमें लेकर निम्नलिखित मन्त्र पढ़े—

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक।
भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद॥
अनेन सफलार्घ्येण वरदोऽस्तु सदा मम॥

श्रीगणेशाम्बिकाभ्यां नमः, विशेषार्घं समर्पयामि। (विशेषार्घ दे।)

प्रार्थना—

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥
त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फलप्रदेति।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव॥

---

* आर्षत्वात्सुपो लुक्।

त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्तमेतत् त्वं वै प्रसन्ना भुवि मुक्तिहेतुः॥

श्रीगणेशाम्बिकाभ्यां नमः, प्रार्थनापूर्वकं नमस्कारान् समर्पयामि। (साष्टांग नमस्कार करे।)

गणेशपूजने कर्म यन्न्यूनमधिकं कृतम्।
तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम॥
अनया पूजया श्रीगणेशाम्बिके प्रीयेताम्, न मम।

(ऐसा कहकर समस्त पूजनकर्म भगवान्‌को समर्पित कर दे तथा पुनः नमस्कार करे।)

गोदानके लिये ब्राह्मणवरण—यजमान अपनी दाहिनी ओर आसनपर ब्राह्मणको ससम्मान उत्तराभिमुख बैठाये और पूर्वाभिमुख स्वयं बैठ जाय। उसके बाद हाथमें त्रिकुश, जल, अक्षत, पुष्प तथा वरण-द्रव्य लेकर ब्राह्मणका वरण करे—

वरण-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः अद्य यथोक्तगुणविशिष्टतिथ्यादौ ....गोत्रः ....शर्मा/ वर्मा/गुप्तोऽहम् (यदि प्रतिनिधि करे तो '**अहम्**'के स्थानपर **....गोत्रस्य (....गोत्रायाः) प्रतिनिधिभूतोऽहम्**— इतना बोले) **संकल्पितोद्देश्येन करिष्यमाणसवत्सगवीदानकर्मणि एभिर्वरणद्रव्यैः ....गोत्रं ....शर्माणं ब्राह्मणं भवन्तं गोदानप्रतिग्रहीतृत्वेन वृणे।**

इस प्रकार संकल्पकर द्रव्य आदि ब्राह्मणको दे दे।

ब्राह्मण-वचन—वरण-द्रव्य लेकर ब्राह्मण बोले—'**वृतोऽस्मि**'।

ब्राह्मणपूजन—यजमान ब्राह्मणदेवताके दोनों चरणोंको निम्नलिखित मन्त्रसे धोये—

आपद्घनध्वान्तसहस्रभानवः समीहितार्थार्पणकामधेनवः।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादरेणवः॥

गोपूजनकी विधि

गोपूजनके समय गायको भूसा, चूनी तथा गुड़ आदि खिलाना चाहिये।

गौको प्रणाम कर निम्नलिखित मन्त्रसे उसका प्रोक्षण करे—

ॐ इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या।
व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा॥

इसके बाद गौके अंगोंमें निम्नलिखित मन्त्रोंसे उन-उन देवताओंका आवाहन करे—

गौके अंगोंमें देवताओंका आवाहन

सींगोंकी जड़ोंमें—**ॐ ब्रह्मविष्णुभ्यां नमः, शृङ्गमूलयोर्ब्रह्मविष्णू आवाहयामि।**

सींगोंके अग्रभागमें—**ॐ सर्वतीर्थेभ्यो नमः, शृङ्गाग्रे सर्वतीर्थानावाहयामि।**

सिरके बीचमें—**ॐ महादेवाय नमः, शिरोमध्ये महादेवमावाहयामि।**

ललाटमें—**ॐ गौर्यै नमः, ललाटे गौरीमावाहयामि।**

नासावंशमें—**ॐ कम्बलाश्वतराभ्यां नमः, नासापुटयोः कम्बलाश्वतरौ आवाहयामि।**

कानोंमें—**ॐ अश्विभ्यां नमः, कर्णयोरश्विनौ आवाहयामि।**

नेत्रोंमें—**ॐ शशिभास्कराभ्यां नमः, नेत्रयोः शशिभास्करौ आवाहयामि।**

दाँतोंमें—**ॐ सर्ववायवे नमः, दन्तेषु सर्ववायुमावाहयामि।**

जिह्वामें—**ॐ वरुणाय नमः, जिह्वायां वरुणमावाहयामि।**

हुंकारमें—**ॐ सरस्वत्यै नमः, हुंकारे सरस्वतीमावाहयामि।**

दोनों गालोंमें—**ॐ मासपक्षाभ्यां नमः, गण्डयोर्मासपक्षौ आवाहयामि।**

दोनों ओठोंमें—**ॐ सन्ध्याद्वयाय नमः, ओष्ठयोः सन्ध्याद्वयमावाहयामि।**

गलेमें—**ॐ इन्द्राय नमः, ग्रीवायामिन्द्रमावाहयामि।**

गलकम्बलमें—**ॐ रक्षोगणेभ्यो नमः, गलकम्बले रक्षोगणानावाहयामि।**

हृदयमें—**ॐ साध्येभ्यो नमः, हृदये साध्यानावाहयामि।**

जाँघोंमें—**ॐ धर्माय नमः, जङ्घयोः धर्ममावाहयामि।**

दोनों खुरोंके बीचमें—**ॐ गन्धर्वेभ्यो नमः, खुरमध्ये गन्धर्वानावाहयामि।**

खुरोंके अग्रभागमें—**ॐ पन्नगेभ्यो नमः, खुराग्रेषु पन्नगानावाहयामि।**

खुरोंके मूलमें—**ॐ अप्सरेभ्यो नमः, खुरमूलेषु अप्सरोगणानावाहयामि।**

पीठमें—**ॐ एकादशरुद्रेभ्यो नमः, पृष्ठे एकादशरुद्रानावाहयामि।**

सभी सन्धियोंमें—**ॐ वसुभ्यो नमः, सर्वसन्धिषु वसूनावाहयामि।**

कटिभागमें—**ॐ पितृभ्यो नमः, कटिद्वये पितृनावाहयामि।**

पूँछमें—**ॐ सोमाय नमः, पुच्छे सोममावाहयामि।**

शरीरके अधोभागमें—**ॐ द्वादशादित्येभ्यो नमः, निम्नाङ्गेषु द्वादशादित्यानावाहयामि।**

केशोंमें—**ॐ सूर्यरश्मिभ्यो नमः, केशेषु सूर्यरश्मीनावाहयामि।**

गोमूत्रमें—**ॐ गङ्गायै नमः, गोमूत्रे गङ्गामावाहयामि। ॐ यमुनायै नमः, गोमूत्रे यमुनामावाहयामि।**

गोमयभागमें—**ॐ लक्ष्म्यै नमः, गोमये लक्ष्मीमावाहयामि।**

दूधमें—**ॐ सरस्वत्यै नमः, दुग्धे सरस्वतीमावाहयामि।**

दधिमें—**ॐ नर्मदायै नमः, दध्नि नर्मदामावाहयामि।**

घीमें—**ॐ वह्नचै नमः, घृते वह्निमावाहयामि।**

रोमोंमें—**ॐ त्रयस्त्रिंशत्कोटिदेवेभ्यो नमः, रोमेषु त्रयस्त्रिंशत्कोटिदेवानावाहयामि।**

पेटमें—**ॐ पृथिव्यै नमः, उदरे पृथिवीमावाहयामि।**

स्तनोंमें—**ॐ चतुर्भ्यः सागरेभ्यो नमः, स्तनेषु चतुरः सागरानावाहयामि।**

पूरे शरीरमें—**ॐ कामधेनवे नमः, सर्वाङ्गेषु कामधेनुमावाहयामि।**

प्रतिष्ठा—हाथमें अक्षत लेकर निम्नलिखित मन्त्र पढ़कर गायके अंगोंपर छिड़क दे—

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु।
विश्वे देवास इह मादयन्तामो३ म्प्रतिष्ठ॥

उक्ताः ब्रह्मादिकामधेन्वन्तदेवताः सुप्रतिष्ठिता भवन्तु, आवाहयामि, स्थापयामि, पूजयामि।

विविध उपचारोंद्वारा गोपूजन

आवाहितब्रह्मादिदेवतासहितायै सवत्सायै गवे नमः, पुष्पाञ्जलिं समर्पयामि। (पुष्पांजलि अर्पित करे।)

पाद्य—

सौरभेयि सर्वहिते पवित्रे पापनाशिनि।
प्रतिगृह्य मया दत्तं पाद्यं त्रैलोक्यवन्दिते॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, पाद्यं समर्पयामि। (जल चढ़ाये।)

अर्घ—

देहे स्थितासि रुद्राणि शंकरस्य सदा प्रिये।
धेनुरूपेण सा देवी मम पापं व्यपोहतु॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, अर्घं समर्पयामि। (अर्घ प्रदान करे।)

आचमन—

या लक्ष्मीः सर्वभूतेषु या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम पापं व्यपोहतु॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, आचमनीयं जलं समर्पयामि। (जल दे।)

स्नान—

सर्वदेवमयी मातः सर्वदेवनमस्कृते।
तोयमेतत् सुखस्पर्शं स्नानार्थं गृह्ण धेनुके॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, स्नानीयं जलं समर्पयामि। (स्नानके लिये जल अर्पित करे।)

स्नानांग-आचमन—स्नानान्ते आचमनीयं जलं समर्पयामि। (जल दे)।

वस्त्र और उपवस्त्र—

आच्छादनं ददाम्येतत् सम्यक् शुद्धं सुशोभनम्।
सुरभे वस्त्रदानेन प्रीयतां परमेश्वरि॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, वस्त्रोपवस्त्रं समर्पयामि। (गौको वस्त्र-उपवस्त्र ओढ़ा दे।)

आचमन—वस्त्रान्ते आचमनीयं जलं समर्पयामि। (जल दे)।

चन्दन—

सर्वदेवप्रियं देवि चन्दनं चन्द्रसन्निभम्।
कस्तूरीकुङ्कुमाढ्यं च प्रीत्यर्थं प्रतिगृह्यताम्॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, चन्दनानुलेपनं समर्पयामि। (गौके मस्तक आदिमें चन्दन चढ़ाये।)

अक्षत—

अक्षतान् तिलजान् देवि शुभ्रचन्दनमिश्रितान्।
गृहाण परमप्रीत्या गौस्त्वं त्रिदिवपूजिते॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, अक्षतान् समर्पयामि। (अक्षत चढ़ाये।)

अलंकार, पात्र आदि—शृङ्गभूषणार्थं स्वर्णशृङ्गम्, चरणभूषणार्थं रौप्यखुरम्, घण्टाम्, दोहनार्थं कांस्यपात्रम्, सर्वालङ्कारार्थं च यथाशक्ति द्रव्यं समर्पयामि।

आवाहितदेवतासहितायै सवत्सायै गवे नमः, अलङ्कारादिवस्तूनि समर्पयामि। (गौके लिये आभूषण प्रदान करे।)

पुष्पमाला—

पुष्पमालां तथा जातिपाटलाचम्पकानि च।
पुष्पाणि गृह्ण धेनो त्वं सर्वविघ्नप्रणाशिनि॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, पुष्पाणि समर्पयामि। (पुष्प चढ़ाये।)

धूप—

देवद्रुमरसोद्भूतं गोघृतेन समन्वितम्।
प्रयच्छामि महाभागे धूपोऽयं प्रतिगृह्यताम्॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, धूपमाघ्रापयामि। (धूप दिखाये।)

दीप—

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेशि त्रैलोक्यतिमिरापहम्॥

दीपं प्रदर्शयामि। (दीप दिखाये।) **सवत्सायै गवे नमः। हस्तं प्रक्षाल्य नैवेद्यफलञ्च निधाय जलेनाभ्युक्ष्य तत्र तुलसीदलं प्रक्षिप्य निवेदयेत्।** (हाथ धो ले। नैवेद्य यथास्थान रखकर जलसे प्रोक्षितकर उसमें तुलसीदल छोड़कर निवेदित करे।)

नैवेद्य—

ॐ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, नैवेद्यं फलं च समर्पयामि। (नैवेद्य और फल निवेदित करे।) **नैवेद्यान्ते आचमनीयं जलं समर्पयामि।** (नैवेद्यके बाद आचमनके लिये जल दे।) **करोद्वर्तनकं समर्पयामि** (करोद्वर्तनके लिये दोनों हाथोंकी अनामिकासे गन्ध दे।) **ताम्बूलं समर्पयामि** (ताम्बूल निवेदित करे।)

पुष्पांजलि—

ॐ गोभ्यो यज्ञाः प्रवर्तन्ते गोभ्यो देवाः समुत्थिताः।
गोभ्यो वेदाः समुत्कीर्णाः सषडङ्गपदक्रमाः॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, पुष्पाञ्जलिं समर्पयामि। (पुष्पांजलि प्रदान करे।)

दक्षिणा—

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

आवाहितदेवतासहितायै सवत्सायै गवे नमः, पूजासाद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि। (दक्षिणा अर्पित करे।)

प्रदक्षिणा—

पदे पदे या परिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति।
तां सर्वपापक्षयहेतुभूतां प्रदक्षिणान्ते परितः करोमि॥

आवाहितपूजितसमस्तदेवतासहितायै सवत्सायै गवे नमः, प्रदक्षिणां समर्पयामि। (गौकी प्रदक्षिणा करे। चार प्रदक्षिणा करनी चाहिये अथवा एक प्रदक्षिणा भी की जा सकती है।)

गोपूजनके अनन्तर गोपुच्छोदकसे तर्पण करना चाहिये।

गोपुच्छोदकतर्पण

गायकी पूँछ पकड़कर तर्पण करना चाहिये। सव्य पूर्वाभिमुख होकर दाहिने हाथमें त्रिकुश, अक्षत, जल और गोपुच्छ लेकर तर्पण करे। तर्पणके जलको इकट्ठा करनेके लिये पूँछके नीचे जलपात्रको रख ले। हाथमें गोपुच्छ लेनेमें कठिनाई हो तो पूँछमें मौली बाँधकर मौलीको हाथमें रख ले। तर्पणके समय दूसरा व्यक्ति हाथमें जल डालता जाय।

देवतर्पण—पूर्वदिशामें मुख करके सव्यावस्थामें निम्नलिखित प्रत्येक नाममन्त्रके बाद '**तृप्यतु**' अथवा '**तृप्यताम्**' कहकर एक-एक अंजलि जल देवतीर्थसे देता जाय—

ॐ ब्रह्मा तृप्यतु। ॐ विष्णुस्तृप्यतु। ॐ रुद्रस्तृप्यतु। ॐ मनवस्तृप्यन्तु (तृप्यन्ताम्)। ॐ ऋषयस्तृप्यन्तु। ॐ रुद्रातिपुत्रास्तृप्यन्तु। ॐ साध्यास्तृप्यन्तु। ॐ मरुद्गणास्तृप्यन्तु। ॐ ग्रहास्तृप्यन्तु। ॐ नक्षत्राणि तृप्यन्तु। ॐ योगास्तृप्यन्तु। ॐ राशयस्तृप्यन्तु। ॐ वसुधा तृप्यतु। ॐ अश्विनौ तृप्येताम्। ॐ यक्षास्तृप्यन्तु। ॐ रक्षांसि तृप्यन्तु। ॐ मातरस्तृप्यन्तु। ॐ रुद्रास्तृप्यन्तु। ॐ पिशाचास्तृप्यन्तु। ॐ सुपर्णास्तृप्यन्तु। ॐ पशवस्तृप्यन्तु। ॐ दानवास्तृप्यन्तु। ॐ योगिनस्तृप्यन्तु। ॐ विद्याधरास्तृप्यन्तु। ॐ ओषधयस्तृप्यन्तु। ॐ दिग्गजास्तृप्यन्तु। ॐ देवगणास्तृप्यन्तु। ॐ देवपत्न्यस्तृप्यन्तु। ॐ लोकपालास्तृप्यन्तु। ॐ नारदस्तृप्यतु। ॐ जन्तवस्तृप्यन्तु। ॐ स्थावरास्तृप्यन्तु। ॐ जङ्गमास्तृप्यन्तु।

ऋषितर्पण—निम्नलिखित मन्त्रोंसे मरीचि आदि ऋषियोंको भी एक-एक अंजलि जल दे—

ॐ मरीचिस्तृप्यताम्। ॐ अत्रिस्तृप्यताम्। ॐ अङ्गिरास्तृप्यताम्। ॐ पुलस्त्यस्तृप्यताम्। ॐ पुलहस्तृप्यताम्। ॐ क्रतुस्तृप्यताम्। ॐ वसिष्ठस्तृप्यताम्। ॐ प्रचेतास्तृप्यताम्। ॐ भृगुस्तृप्यताम्। ॐ नारदस्तृप्यताम्।

दिव्य मनुष्यतर्पण—दिव्य मनुष्यतर्पणमें—१. उत्तर दिशाकी ओर मुँह करे।[1] २. जनेऊको कण्ठीकी तरह कर ले। ३. गमछेको भी कण्ठीकी तरह कर ले। ४. सीधा बैठे। कोई घुटना जमीनपर न लगाये।[2] ५. अर्घपात्रमें जौ छोड़े। ६. तीनों कुशोंको उत्तराग्र रखे। ७. प्राजापत्य (काय) तीर्थसे अर्थात् कुशोंको दाहिने हाथकी कनिष्ठिकाके मूलभागमें रखकर यहींसे जल दे। ८. दो-दो अंजलियाँ जल दे।[3]

अंजलिदानके मन्त्र—ॐ सनकस्तृप्यताम् (२)। ॐ सनन्दनस्तृप्यताम् (२)। ॐ सनातनस्तृप्यताम् (२)। ॐ कपिलस्तृप्यताम् (२)। ॐ आसुरिस्तृप्यताम् (२)। ॐ वोढुस्तृप्यताम् (२)। ॐ पञ्चशिखस्तृप्यताम् (२)।

दिव्य पितृतर्पण—पितृतर्पणमें—१. दक्षिण दिशाकी ओर मुँह करे। २. अपसव्य हो जाय अर्थात् जनेऊको दाहिने कन्धेपर रखकर बायें हाथके नीचे ले जाय।[4] ३. गमछेको भी दाहिने कन्धेपर रखे। ४. बायाँ घुटना जमीनपर लगाकर बैठे।[5] ५. अर्घपात्रमें काले तिल छोड़े।[6] ६. कुशोंको बीचसे मोड़कर उनकी जड़ और अग्रभागको दाहिने हाथमें तर्जनी और अँगूठेके बीचमें रखे। ७. पितृतीर्थसे अर्थात् अँगूठे और तर्जनीके मध्यभागसे अंजलि दे। ८. तीन-तीन अंजलियाँ दे।[7]

उपर्युक्त नियमसे निम्नलिखित तीन-तीन अंजलियाँ एक-एक मन्त्र पढ़कर दे—

ॐ कव्यवाडनलस्तृप्यताम् इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।[8]

---

१. ततः कृत्वा निवीतं तु यज्ञसूत्रमुदङ्मुखः। प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत् पृथक्॥ (विष्णु)

२. मनुष्यतर्पणं कुर्वन्न किञ्चिज्जानु पातयेत्। (पुलस्त्य)

३. द्वौ द्वौ तु सनकादयः अर्हन्ति। (व्यास)

४. जिनके पास यज्ञोपवीत नहीं है, उन्हें उत्तरीय (गमछे)-के द्वारा तर्पणकार्य करना चाहिये।

५. भूलग्नसव्यजानुश्च दक्षिणाग्रकुशेन च। पितॄन् संतर्पयेत्····। (वृद्धपराशर)

६. पितॄन् भक्त्या तिलैः कृष्णैः····। (माधव)

७. अर्हन्ति पितरस्त्रींस्त्रीन्। (व्यास)

८. कुछ पद्धतियोंके अनुसार तर्पणमें केवल '**स्वधा**' का प्रयोग चलता है। परंतु पारस्करगृह्यसूत्रके हरिहरभाष्यमें तर्पण-प्रयोगनिरूपणके अन्तर्गत '**स्वधा नमः**' प्रयोग दिया गया है, जिसके अनुसार यहाँ तर्पणमें '**स्वधा नमः**' का प्रयोग ही उचित है।

ॐ सोमस्तृप्यताम् इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।

ॐ यमस्तृप्यताम् इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।

ॐ अर्यमा तृप्यताम् इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।

ॐ अग्निष्वात्ताः पितरस्तृप्यन्ताम् इदं सतिलं गोपुच्छोदकं तेभ्यः स्वधा नमः, तेभ्यः स्वधा नमः, तेभ्यः स्वधा नमः।

ॐ सोमपाः पितरस्तृप्यन्ताम् इदं सतिलं गोपुच्छोदकं तेभ्यः स्वधा नमः, तेभ्यः स्वधा नमः, तेभ्यः स्वधा नमः।

ॐ बर्हिषदः पितरस्तृप्यन्ताम् इदं सतिलं गोपुच्छोदकं तेभ्यः स्वधा नमः, तेभ्यः स्वधा नमः, तेभ्यः स्वधा नमः।

चतुर्दश यमतर्पण—पूर्ववत् इसी प्रकार निम्नलिखित प्रत्येक नामसे यमराजको पितृतीर्थसे ही दक्षिणाभिमुख तीन-तीन अंजलियाँ दे—

ॐ यमाय नमः (३)। ॐ धर्मराजाय नमः (३)। ॐ मृत्यवे नमः (३)। ॐ अन्तकाय नमः (३)। ॐ वैवस्वताय नमः (३)। ॐ कालाय नमः (३)। ॐ सर्वभूतक्षयाय नमः (३)। ॐ औदुम्बराय नमः (३)। ॐ दध्नाय नमः (३)। ॐ नीलाय नमः (३)। ॐ परमेष्ठिने नमः (३)। ॐ वृकोदराय नमः (३)। ॐ चित्राय नमः (३)। ॐ चित्रगुप्ताय नमः (३)।[१]

पित्र्यादितर्पण[२]—दायें हाथमें मोटक, तिल, जल लेकर अपसव्य दक्षिणाभिमुख हो बायाँ घुटना जमीनपर गिराकर पित्र्यादितर्पण करे—

१. *पिता*—**ॐ अद्य अस्मत्पिता ....गोत्रः ....शर्मा/वर्मा/गुप्तः वसुस्वरूपः इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।** बोलकर पितृतीर्थसे तीन अंजलि जल दे।

२. *पितामह*—**ॐ अद्य अस्मत्पितामहः ....गोत्रः ....शर्मा/वर्मा/गुप्तः रुद्रस्वरूपः इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।** बोलकर पितृतीर्थसे तीन अंजलि जल दे।

३. *प्रपितामह*—**ॐ अद्य अस्मत् प्रपितामहः ....गोत्रः ....शर्मा/वर्मा/गुप्तः आदित्यस्वरूपः इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।** बोलकर पितृतीर्थसे तीन अंजलि जल दे।

४. *माता*—**ॐ अद्य अस्मन्माता ....गोत्रा ....देवी वसुस्वरूपा इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः, तस्यै स्वधा नमः, तस्यै स्वधा नमः।** बोलकर पितृतीर्थसे तीन अंजलि जल दे।

५. *पितामही*—**ॐ अद्य अस्मत्पितामही ....गोत्रा ....देवी रुद्रस्वरूपा इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः, तस्यै स्वधा नमः, तस्यै स्वधा नमः।** बोलकर पितृतीर्थसे तीन अंजलि जल दे।

६. *प्रपितामही*—**ॐ अद्य अस्मत् प्रपितामही ....गोत्रा ....देवी आदित्यस्वरूपा इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः, तस्यै स्वधा नमः, तस्यै स्वधा नमः।** बोलकर पितृतीर्थसे तीन अंजलि जल दे।

७. *सौतेली माँ*—**ॐ अद्य अस्मत् सापत्नमाता ....गोत्रा ....देवी इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः, तस्यै स्वधा नमः, तस्यै स्वधा नमः।** बोलकर पितृतीर्थसे तीन अंजलि जल दे।

द्वितीय गोत्रतर्पण—

१. *मातामह (नाना)*—**ॐ अद्य अस्मन्मातामहः ....गोत्रः ....शर्मा वसुस्वरूपः इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।** बोलकर पितृतीर्थसे तीन बार जल दे।

---

१. यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥ (मत्स्यपु० १०२। २३-२४, कात्यायनपरिशिष्ट)

२. धर्मशास्त्रोंमें श्राद्ध तथा तर्पणके लिये विविध गोत्रवाले पितरोंकी गणना इस प्रकार की गयी है—
ताताम्बात्रितयं सपत्नजननी मातामहादित्रयं सस्त्रिस्त्रीतनयादितातजननीस्वभ्रातरस्तत् स्त्रियः।
ताताम्बाऽऽत्मभगिन्यपत्यधवयुग् जायापिता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे॥

२. *प्रमातामह (परनाना)*—**ॐ अद्य अस्मत् प्रमातामहः ""गोत्रः ""शर्मा रुद्रस्वरूपः इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।** बोलकर पितृतीर्थसे तीन बार जल दे।

३. *वृद्धप्रमातामह (वृद्धपरनाना)*—**ॐ अद्य अस्मद् वृद्धप्रमातामहः ""गोत्रः ""शर्मा आदित्यस्वरूपः इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः।** बोलकर पितृतीर्थसे तीन बार जल दे।

४. *मातामही (नानी)*—**ॐ अद्य अस्मन्मातामही ""गोत्रा ""देवी वसुस्वरूपा इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः, तस्यै स्वधा नमः, तस्यै स्वधा नमः।** बोलकर पितृतीर्थसे तीन बार जल दे।

५. *प्रमातामही (परनानी)*—**ॐ अद्य अस्मत् प्रमातामही ""गोत्रा ""देवी रुद्रस्वरूपा इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः, तस्यै स्वधा नमः, तस्यै स्वधा नमः।** बोलकर पितृतीर्थसे तीन बार जल दे।

६. *वृद्धप्रमातामही (वृद्धपरनानी)*—**ॐ अद्य अस्मद् वृद्धप्रमातामही ""गोत्रा ""देवी आदित्यस्वरूपा इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः, तस्यै स्वधा नमः, तस्यै स्वधा नमः।** बोलकर पितृतीर्थसे तीन बार जल दे।

पत्न्यादि-तर्पण*—(एक अंजलि जल दे।)

१. *पत्नी*—**ॐ अद्य अस्मत् पत्नी ""देवी इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः १।**

२. *पुत्र*—**ॐ अद्य अस्मत् पुत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

३. *चाचा*—**ॐ अद्य अस्मत् पितृव्यः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

४. *चाची*—**ॐ अद्य अस्मत् पितृव्यपत्नी ""देवी इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः १।**

५. *चाचाका लड़का*—**ॐ अद्य अस्मत् पितृव्यपुत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

६. *मामा*—**ॐ अद्य अस्मन्मातुलः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

७. *मामी*—**ॐ अद्य अस्मन्मातुलानी ""गोत्रा ""देवी इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः १।**

८. *ममियाउत भाई*—**ॐ अद्य अस्मन्मातुलपुत्रः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

९. *भाई*—**ॐ अद्य अस्मद् भ्राता ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

१०. *भाईकी स्त्री*—**ॐ अद्य अस्मद् भ्रातृपत्नी ""देवी इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः १।**

११. *भतीजा*—**ॐ अद्य अस्मद् भ्रातृपुत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

१२. *फूफा*—**ॐ अद्य अस्मत् पितृष्वसृपतिः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

१३. *फूआ*—**ॐ अद्य अस्मत् पितृष्वसा ""गोत्रा ""देवी इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः१।**

१४. *फूआका लड़का*—**ॐ अद्य अस्मत् पैतृष्वस्त्रेयः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

१५. *मौसा*—**ॐ अद्य अस्मन्मातृष्वसृपतिः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

१६. *मौसी*—**ॐ अद्य अस्मन्मातृष्वसा ""गोत्रा ""देवी इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः १।**

१७. *मौसीया भाई*—**ॐ अद्य अस्मन्मातृष्वस्त्रेयः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

१८. *अपनी बहन*—**ॐ अद्य अस्मद्भगिनी ""गोत्रा ""देवी इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः १।**

१९. *बहनोई*—**ॐ अद्य अस्मद्भगिनीपतिः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

२०. *बहनका लड़का (भांजा)*—**ॐ अद्य अस्मद्भागिनेयः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

२१. *श्वशुर*—**ॐ अद्य अस्मच्छ्वशुरः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः१।**

२२. *सासु*—**ॐ अद्य अस्मच्छ्वश्रुः ""गोत्रा ""देवी इदं सतिलं गोपुच्छोदकं तस्यै स्वधा नमः१।**

२३. *गुरु*—**ॐ अद्य अस्मद् गुरुः ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः१।**

२४. *मित्र*—**ॐ अद्य अस्मन्मित्रम् ""गोत्रः ""शर्मा इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः १।**

२५. *नौकर*—**ॐ अद्य अस्मद् भृत्यः ""नामधेयः इदं सतिलं गोपुच्छोदकं तस्मै स्वधा नमः१।**

तदनन्तर निम्नलिखित श्लोकोंको बोलते हुए गोपुच्छोदकसे पितृतीर्थसे जलधारा देते हुए तर्पण करे—

मातृपक्षाश्च ये केचिद् ये केचित् पितृपक्षकाः। गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः॥
ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः। क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा॥
विरूपा आमगर्भाश्च ज्ञाताज्ञातकुले मम। ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः॥

*यहाँ सभी निकटतम सम्बन्धियोंके लिये तर्पण लिखा गया है, जिनको देना हो उनके नाम, गोत्र और अपना सम्बन्ध बोलकर देना चाहिये। ब्राह्मणके लिये '**शर्मा**', क्षत्रियके लिये '**वर्मा**' तथा वैश्यके लिये '**गुप्त**' नामके आगे जोड़ देना चाहिये।

वृक्षयोनिगता ये च पर्वतत्वं गताश्च ये। पशुयोनिगता ये च ये च कीटपतङ्गकाः।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः॥
नरके रौरवे ये च महारौरवसंस्थिताः। असिपत्रवने घोरे कुम्भीपाकस्थिताश्च ये।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः॥
स्वार्थबद्धा मृता ये च शस्त्रघातमृताश्च ये। ब्रह्महस्तमृता ये च नारीहस्तमृताश्च ये।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः॥
पाशमध्ये मृता ये च स्वल्पमृत्युवशंगताः। सर्वे च मानवा नागाः पशवः पक्षिणस्तथा।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः॥
आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः। तृप्यन्तु सर्वदा सर्वे गोपुच्छोदकतर्पणैः॥

इसके बाद भीष्मपितामहको निम्न श्लोक बोलते हुए पितृतीर्थ और कुशोंसे जल दे—

वैयाघ्रपदगोत्राय सांकृत्यप्रवराय च। अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे॥

इसके बाद सव्य, पूर्वाभिमुख होकर निम्नलिखित मन्त्रसे देवतीर्थसे जलधारा दे—

देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः। पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः॥
जलेचरा भूनिलया वाय्वाधाराश्च जन्तवः। तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः॥

हाथ जोड़कर बोले—**ॐ ब्रह्मणे नमः, ॐ विष्णवे नमः, ॐ रुद्राय नमः।**

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
यत्पादपङ्कजस्मरणाद् यस्य नामजपादपि। न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम्॥
ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।

गोदानका संकल्प—त्रिकुश, तिल, जल, पुष्प और दक्षिणा लेकर गोपुच्छ पकड़कर गोदानका संकल्प करे—

ॐ विष्णुर्विष्णुर्विष्णुः नमः परमात्मने पुरुषोत्तमाय ॐ तत्सत् अद्यैतस्य अचिन्त्यशक्तेर्महाविष्णोराज्ञया जगत्सृष्टिकर्मणि प्रवर्तमानस्य परार्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे बौद्धावतारे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशान्तर्गते प्रजापतिक्षेत्रे ....स्थाने (काशीमें करना हो तो **अविमुक्तवाराणसीक्षेत्रे गौरीमुखे त्रिकण्टकविराजिते महाश्मशाने आनन्दवने भगवत्या उत्तरवाहिन्या भागीरथ्या गङ्गायाः पश्चिमे भागे) बौद्धावतारे ....संवत्सरे ....अयने ....ऋतौ ....मासे ....पक्षे ....तिथौ ....वासरे ....योगे ....राशिस्थिते सूर्ये ....राशिस्थिते देवगुरौ ....राशिस्थिते चन्द्रे शेषेषु भौमादिग्रहेषु यथा यथाराशिस्थितेषु सत्सु एवं ग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ....गोत्रः ....शर्मा/ वर्मा/गुप्तोऽहम्** [यदि प्रतिनिधि करे तो '**अहम्**' के स्थानपर ....**गोत्रस्य (....गोत्रायाः) प्रतिनिधिभूतोऽहम्**—इतना बोले] **शास्त्रोक्तफलप्राप्त्यर्थं भगवत्प्रीत्यर्थं च स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठीं कांस्योपदोहनां वस्त्राच्छन्नां यथाशक्त्यलङ्कृतां सुपूजितां सोपस्करां सवत्सां रुद्रदैवतामिमां गां ....गोत्राय सुपूजिताय ....शर्मणे ब्राह्मणाय भवते सम्प्रददे,** (प्रतिनिधि करे तो **सम्प्रददामि** बोले।) **न मम।**

इस प्रकार संकल्प बोलकर उत्तराभिमुखस्थित वरण किये गये ब्राह्मणके हाथमें गोपुच्छ, जल तथा अक्षत आदि दे दे।

सांगता-संकल्प—दायें हाथमें त्रिकुश, तिल, जल तथा द्रव्य लेकर संकल्प करे—**ॐ विष्णुर्विष्णुर्विष्णुः अद्य पूर्वोक्तगुणविशिष्टायां शुभपुण्यतिथौ ....गोत्रः ....शर्मा/वर्मा/गुप्तोऽहम्** [यदि प्रतिनिधि करे तो '**अहम्**' के स्थानपर ....**गोत्रस्य (....गोत्रायाः) प्रतिनिधिभूतोऽहम्**—इतना बोले] ....**संकल्पितकार्यसिद्ध्यर्थं कृतस्य**

सवत्सगवीदानकर्मणः सांगतासिद्ध्यर्थमिदं द्रव्यं श्रीमते ""शर्मणे ब्राह्मणाय भवते सम्प्रददे। (प्रतिनिधि करे तो **सम्प्रददामि** बोले।) (दानकी प्रतिष्ठाके लिये संकल्पजल तथा द्रव्य ब्राह्मणको दे दे।)

इसके बाद दान लेनेवाले ब्राह्मण बोलें—'**ॐ स्वस्ति।**'

कोऽदात् कस्मा अदात् कामोऽदात् कामायादात्। कामो दाता कामः प्रतिग्रहीता कामैतत्ते॥

गवाहारका संकल्प—जो लोग गोदानके साथ गायका आहार एक वर्ष अथवा न्यूनाधिक समयके लिये देना चाहें, वे निष्क्रयद्रव्य अथवा आहारसामग्री निम्नलिखित संकल्पके द्वारा दे दें—

हाथमें त्रिकुश, जल, अक्षत लेकर संकल्प करे—

ॐ अद्य ""गोत्रः ""शर्मा/वर्मा/गुप्तोऽहम् [यदि प्रतिनिधि करे तो '**अहम्**'के स्थानपर **""गोत्रस्य (""गोत्रायाः) प्रतिनिधिभूतोऽहम्**—इतना बोले] **गवाहारसम्पादनार्थं गवाहारसामग्रीं/गवाहारनिष्क्रयद्रव्यं ""गोत्राय ""शर्मणे ब्राह्मणाय भवते सम्प्रददे,** (प्रतिनिधि करे तो **सम्प्रददामि** बोले।) **न मम।**

सांगता-संकल्प—**ॐ अद्य ""गोत्रः ""शर्मा/वर्मा/गुप्तोऽहम्** [यदि प्रतिनिधि करे तो '**अहम्**' के स्थानपर **""गोत्रस्य (""गोत्रायाः) प्रतिनिधिभूतोऽहम्**—इतना बोले] **कृतस्य गवाहारदानकर्मणः प्रतिष्ठासांगतासंसिद्ध्यर्थं दक्षिणाद्रव्यं ""गोत्राय ""ब्राह्मणाय भवते सम्प्रददे।** (प्रतिनिधि करे तो **सम्प्रददामि** बोले।) कहकर दक्षिणा ब्राह्मणको दे दे।

प्रार्थना—इसके बाद ब्राह्मणकी प्रार्थना करे—

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च। जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

इसके बाद निम्नलिखित गोमतीविद्याका पाठ करे—

गोमतीविद्या

गावो मामुपतिष्ठन्तु हेमशृंग्यः पयोमुचः। सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा॥
गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा। गावोऽस्माकं वयं तासां यतो गावस्ततो वयम्॥
गावः सुरभयो नित्यं गावो गुग्गुलगन्धिकाः। गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं परम्॥
अन्नमेव परं गावो देवानां हविरुत्तमम्। पावनं सर्वभूतानां रक्षन्ति च वहन्ति च॥
हविषा मन्त्रपूतेन तर्पयन्त्यमरान् दिवि। ऋषीणामग्निहोत्रेषु गावो होमे प्रयोजिताः॥
सर्वेषामेव भूतानां गावः शरणमुत्तमम्। गावः पवित्रं परमं गावो मङ्गलमुत्तमम्॥
गावः स्वर्गस्य सोपानं गावः स्वर्गेऽपि पूजिताः। गावः कामदुहो देव्यो नान्यत् किंचित् परं स्मृतम्॥
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्। एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति॥
घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः। घृतनद्यो घृतावर्तास्ता मे सन्तु सदा गृहे॥
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम्। घृतं मे सर्वतश्चैव घृतं मनसि वै घृतम्॥
गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे सर्वतः सन्तु गवां मध्ये वसाम्यहम्॥
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश। यस्मात् तस्माच्छिवं मे स्यादिह लोके परत्र च॥

विष्णुस्मरण—

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

अनेन गोदानकर्मणा भगवान् विष्णुः प्रीयतां न मम।

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।

ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः।

पंचधेनुदान-विधि

सब प्रकारके अभ्युदयोंकी प्राप्ति तथा सद्‌गतिके लिये पाँच प्रकारकी गौओंके दानका विधान है। पाँच गौओंके नाम इस प्रकार हैं—(१) ऋणापनोदधेनु, (२) पापापनोदधेनु, (३) उत्क्रान्तिधेनु, (४) वैतरणीधेनु तथा (५) मोक्षधेनु। इनके दानका उद्देश्य इस प्रकार है—

जन्म लेनेके साथ ही मनुष्यपर तीन ऋण लग जाते हैं—१. देव-ऋण, २. पितृ-ऋण तथा ३. मनुष्य-ऋण। इनके अतिरिक्त मनुष्य आवश्यकतानुसार अन्य ऋण भी ले लेता है। इन सभी ऋणोंसे लगे पापको नष्ट करनेके लिये और भगवान्‌की प्रसन्नताके लिये '**ऋणापनोदधेनु**'का दान दिया जाता है। इसी तरह ज्ञात-अज्ञात पापोंसे छुटकारा पानेके लिये एवं भगवान्‌की प्रसन्नताके लिये '**पापापनोदधेनु**'का दान दिया जाता है। अन्तिम समयमें प्राणोत्सर्गमें अत्यधिक कष्टकी अनुभूति होती है। सुखपूर्वक प्राणोत्सर्गके लिये '**उत्क्रान्तिधेनु**'का दान दिया जाता है। इसी प्रकार यममार्गमें स्थित घोर वैतरणी नदीको पार करनेके लिये '**वैतरणीधेनु**'का दान दिया जाता है और मोक्षप्राप्तिके लिये '**मोक्षधेनु**'का दान दिया जाता है।

पंचधेनुका दान निष्क्रयरूपमें करना हो तो '**सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि, गणेशाम्बिकाभ्यां नमः**'—ऐसा कहकर गणेशाम्बिका-पूजनके अनन्तर संकल्पमात्रसे कर देना चाहिये।

मरणासन्न व्यक्तिके लिये समयाभावके कारण पंचधेनुनिष्क्रयद्रव्यदानका एक संयुक्त संकल्प भी यहाँ दिया जा रहा है। अन्तिम कालकी शीघ्रतामें इस संकल्पके द्वारा भी पंचधेनुदान सम्पन्न हो सकता है। दानके संकल्पमें ही प्रतिज्ञा एवं वरण-संकल्प भी सम्मिलित है, अतः '**सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि**' कहकर ब्राह्मण-पूजन करनेके अनन्तर निम्न संकल्प करे—

पंचधेनुदानके निष्क्रयका संकल्प

हाथमें कुश, अक्षत, जल तथा कुछ निष्क्रय द्रव्य लेकर बोले—

ॐ विष्णुर्विष्णुर्विष्णुः अद्य यथोक्तगुणविशिष्टतिथ्यादौ ....गोत्रः ....शर्मा/ वर्मा/गुप्तोऽहम् [यदि प्रतिनिधि करे तो '**अहम्**'के स्थानपर **....गोत्रस्य (....गोत्रायाः) प्रतिनिधिभूतोऽहं तदुद्देश्येन**—इतना कहे] **ऐहिकामुष्मिकानेकजन्मार्जितसमस्तपापक्षयपूर्वकदेवर्षिपितृमनुष्यादिऋणापनोदनार्थं ज्ञाताज्ञातमनोवाक्कायकृत-सकलपापक्षयार्थं प्राणप्रयाणकाले ससुखं प्राणोत्क्रमणार्थं यममार्गस्थितां महाघोरां शतयोजनविस्तीर्णां वैतरणीं सुखेन संतरणार्थं भगवत्प्रसादात् मोक्षप्राप्तये श्रीमहाविष्णुप्रीत्यर्थं प्रतिज्ञापूर्वकं ऋणापनोदधेनु-पापापनोदधेनूत्क्रान्तिधेनुवैतरणीधेनुमोक्षधेनूनां रुद्रदैवतानां निष्क्रयभूतं द्रव्यं वृताय पूजिताय ....गोत्राय ब्राह्मणाय भवते सम्प्रददे (सम्प्रददामि)**। कहकर संकल्पजल तथा द्रव्य ब्राह्मणको दे दे।

सांगता-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः अद्य यथोक्तगुणविशिष्टतिथ्यादौ ....गोत्रः ....शर्मा/ वर्मा/गुप्तोऽहम् [यदि प्रतिनिधि करे तो '**अहम्**'के स्थानपर **....गोत्रस्य (....गोत्रायाः) प्रतिनिधिभूतोऽहं तदुद्देश्येन**—इतना कहे] **कृतस्य पूर्वोक्तपञ्चधेनुनिष्क्रयभूतदानाख्यकर्मणः प्रतिष्ठासांगतासंसिद्ध्यर्थं दक्षिणाद्रव्यं भवते सम्प्रददे (सम्प्रददामि)**। कहकर द्रव्य दे दे।

विष्णुस्मरण—

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।

पंचधेनुदानका पृथक्-पृथक् विधान

इन पाँचों गोदानोंमें '**ॐ गवे नमः**' इस मन्त्रद्वारा गन्ध, अक्षत, पुष्प तथा पुष्पमाला आदि उपचारोंसे संक्षेपमें गोपूजन कर ले तथा निम्नलिखित मन्त्रसे गोप्रार्थना करे—

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥
गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे सर्वतः सन्तु गवां मध्ये वसाम्यहम्॥

पाँचों गोदानोंका दानसंकल्प यहाँ अलग-अलग लिखा जा रहा है। इन्हीं संकल्पोंमें प्रतिज्ञा, वरण तथा सांगता-संकल्प भी सम्मिलित हैं। **'सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि'** कहकर गणेशाम्बिकापूजन तथा ब्राह्मणका पूजन कर ले। वरण और सांगताके लिये हाथमें त्रिकुश, अक्षत, जलके साथ कुछ द्रव्य भी रख ले।

(१) ऋणापनोदधेनु-दान

दान-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः नमः पुराणपुरुषोत्तमाय ॐ तत्सत् अद्यैतस्य अचिन्त्यशक्तेर्महाविष्णोराज्ञया जगत्सृष्टिकर्मणि प्रवर्तमानस्य परार्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे श्रीश्वेत-वाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशान्तर्गते प्रजापतिक्षेत्रे ....स्थाने (काशीमें करना हो तो **अविमुक्तवाराणसीक्षेत्रे गौरीमुखे त्रिकण्टकविराजिते महाश्मशाने आनन्दवने भगवत्या उत्तरवाहिन्या भागीरथ्या गङ्गाया वामभागे) ....संवत्सरे ....अयने ....ऋतौ ....मासे ....पक्षे ....तिथौ ....वासरे एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ ....गोत्रः ....शर्मा/ वर्मा/गुप्तोऽहम्** [यदि प्रतिनिधि करे तो **'अहम्'**के स्थानपर **....गोत्रस्य (....गोत्रायाः) प्रतिनिधिभूतोऽहं तदुद्देश्येन**—इतना कहे] **ऐहिकामुष्मिकानेकजन्मार्जितदेवर्षिपितृमनुष्यादिसमस्तऋणापनोदनार्थं श्रीविष्णुप्रीतये प्रतिज्ञापूर्वकम् इमां सांगतासहितां रुद्रदैवताम् ऋणापनोदधेनुम्/ऋणापनोदधेनुनिष्क्रयद्रव्यं वृताय पूजिताय ....गोत्राय ....शर्मणे ब्राह्मणाय भवते सम्प्रददे (सम्प्रददामि)**। ऐसा कहकर नीचे लिखे श्लोकको बोलते हुए ब्राह्मणके हाथमें संकल्पजल, गोपुच्छ अथवा गोनिष्क्रय-द्रव्य दे दे।

ऐहिकामुष्मिकं यच्च सप्तजन्मार्जितं त्वृणम्। तत्सर्वं शुद्धिमायातु गामेतां ददतो मम॥

ब्राह्मण बोले—'ॐ स्वस्ति।'

(२) पापापनोदधेनु-दान

दान-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः अद्य यथोक्तगुणविशिष्टतिथ्यादौ ....गोत्रः ....शर्मा/ वर्मा/गुप्तोऽहम् [यदि प्रतिनिधि करे तो **'अहम्'**के स्थानपर **....गोत्रस्य (....गोत्रायाः) प्रतिनिधिभूतोऽहं तदुद्देश्येन**—इतना कहे] **ज्ञाताज्ञातमनोवाक्कायकृतपापानां संक्षयार्थं श्रीपरमेश्वरप्रीतये प्रतिज्ञापूर्वकम् इमां सांगतासहितां रुद्रदैवतां पापापनोदधेनुम्/पापापनोदधेनुनिष्क्रयद्रव्यं वृताय पूजिताय ....गोत्राय ....शर्मणे ....ब्राह्मणाय भवते सम्प्रददे (सम्प्रददामि)**। ऐसा कहकर नीचे लिखे श्लोकको बोलते हुए ब्राह्मणके हाथमें संकल्पजल, गोपुच्छ अथवा गोनिष्क्रय-द्रव्य दे दे—

आजन्मोपार्जितं पापं मनोवाक्कायसम्भवम्। तत्सर्वं नाशमायातु गोप्रदानेन केशव॥

ब्राह्मण बोले—'ॐ स्वस्ति।'

(३) उत्क्रान्तिधेनु-दान

दान-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः अद्य यथोक्तगुणविशिष्टतिथ्यादौ ....गोत्रः ....शर्मा/ वर्मा/गुप्तोऽहम् [यदि प्रतिनिधि करे तो **'अहम्'**के स्थानपर **....गोत्रस्य (....गोत्रायाः) प्रतिनिधिभूतोऽहं तदुद्देश्येन**—इतना कहे] **सुखेन प्राणोत्क्रमणार्थं श्रीपरमेश्वरप्रीतये प्रतिज्ञापूर्वकम् इमां सांगतासहितां रुद्रदैवताम् उत्क्रान्तिधेनुम्/उत्क्रान्तिधेनुनिष्क्रयद्रव्यं वृताय पूजिताय ....गोत्राय ....शर्मणे ....ब्राह्मणाय भवते सम्प्रददे (सम्प्रददामि)**। ऐसा कहकर संकल्पजल, गोपुच्छ अथवा गोनिष्क्रय-द्रव्य ब्राह्मणको दे दे।

ब्राह्मण बोले—'ॐ स्वस्ति।'

(४) वैतरणीधेनु-दान

दान-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः अद्य यथोक्तगुणविशिष्टतिथ्यादौ ....गोत्रः ....शर्मा/ वर्मा/गुप्तोऽहम् [यदि प्रतिनिधि करे तो **'अहम्'**के स्थानपर **....गोत्रस्य (....गोत्रायाः) प्रतिनिधिभूतोऽहं तदुद्देश्येन**—इतना कहे] **यममार्गे स्थितां महाघोरां वैतरणीं सुखेन संतरणकामनया श्रीपरमेश्वरप्रीतये प्रतिज्ञापूर्वकम् इमां सांगतासहितां रुद्रदैवतां वैतरणीधेनुम्/वैतरणीधेनुनिष्क्रयद्रव्यं वृताय पूजिताय ....गोत्राय**

""शर्मणे ब्राह्मणाय भवते सम्प्रददे (सम्प्रददामि)। ऐसा कहकर संकल्पजल, गोपुच्छ या गोनिष्क्रय-द्रव्य निम्नलिखित श्लोक बोलते हुए ब्राह्मणको दे दे—

यमद्वारे महाघोरा या सा वैतरणी नदी। तर्तुकामो ददाम्येनां तुभ्यं वैतरणीञ्च गाम्॥

ब्राह्मण बोले—'ॐ स्वस्ति।'

(५) मोक्षधेनु-दान

दान-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः अद्य यथोक्तगुणविशिष्टतिथ्यादौ ""गोत्रः ""शर्मा/वर्मा/गुप्तोऽहम् [यदि प्रतिनिधि करे तो **'अहम्'** के स्थानपर **""गोत्रस्य (""गोत्रायाः) प्रतिनिधिभूतोऽहं तदुद्देश्येन**—इतना कहे] **भगवत्प्रसादान्मोक्षप्राप्तये प्रतिज्ञापूर्वकम् इमां सांगतासहितां रुद्रदैवतां मोक्षधेनुम्/मोक्षधेनुनिष्क्रयद्रव्यं वृताय पूजिताय ""गोत्राय ""शर्मणे ""ब्राह्मणाय भवते सम्प्रददे (सम्प्रददामि)।** ऐसा कहकर नीचे लिखे श्लोकको बोलते हुए ब्राह्मणके हाथमें संकल्पजल, गोपुच्छ अथवा गोनिष्क्रय-द्रव्य दे दे—

मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन। मोक्षधेनुप्रदानेन मुकुन्दः प्रीयतां मम॥

ब्राह्मण बोले—'ॐ स्वस्ति।'

विष्णुपूजा

अन्तिम अवस्थामें यदि अवसर मिले तो मरणासन्नद्वारा अथवा पुत्र या ब्राह्मणद्वारा प्रतिनिधिरूपमें शालग्रामभगवान्‌का निम्नलिखित उपचारोंद्वारा विष्णुपूजन भी करवाया जा सकता है। पूजनकी शीघ्रतामें नाममन्त्र **'श्रीविष्णवे नमः'**—से पूजन कराया जा सकता है। संक्षेपमें पंचोपचार-विधिसे भी पूजा की जा सकती है। समय कम रहनेपर पुष्पांजलि तथा आरती कर लेनी चाहिये। यदि सम्भव हो तो शालग्रामभगवान्‌को अथवा भगवान्‌के चित्रको मरणासन्नके निकट तुलसीके गमलेपर रखकर पूजन करे।

जिनका यज्ञोपवीत न हुआ हो, उन्हें शालग्रामकी मूर्तिका स्पर्श नहीं करना चाहिये।

ध्यान—

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः॥

श्रीमन्नारायणाय नमः। ध्यानार्थे पुष्पाणि समर्पयामि। (भगवान्‌के सामने पुष्प रख दे।)

शालग्राममें भगवान् विष्णुकी नित्य संनिधि रहती है, इसलिये उनका आवाहन नहीं होता, आवाहनके स्थानपर प्रार्थनापूर्वक पुष्प समर्पित करे। अन्य प्रतिमाओंमें प्रतिष्ठापूर्वक इस प्रकार आवाहन करे—

आवाहन—

आगच्छ भगवन् देव स्थाने चात्र स्थिरो भव। यावत् पूजां करिष्यामि तावत् त्वं संनिधौ भव॥

श्रीमन्नारायणाय नमः। आवाहनार्थे पुष्पं समर्पयामि। (आवाहनके लिये पुष्प चढ़ाये।)

आसन—

अनेकरत्नसंयुक्तं नानामणिगणान्वितम्। भावितं स्वर्णिमं दिव्यमासनं प्रतिगृह्यताम्॥

श्रीमन्नारायणाय नमः। आसनार्थे पुष्पाणि समर्पयामि। (आसनके लिये पुष्प समर्पित करे।)

पाद्य-अर्घ-आचमन—श्रीमन्नारायणाय नमः। पादयोः पाद्यं समर्पयामि। श्रीमन्नारायणाय नमः। हस्तयोरर्घं समर्पयामि। श्रीमन्नारायणाय नमः। आचमनीयं जलं समर्पयामि। (पाद्य-जल, अर्घ-जल तथा आचमनके लिये जल दे।)

स्नान—

मन्दाकिन्यास्तु यद् वारि सर्वपापहरं शुभम्। तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम्॥

श्रीमन्नारायणाय नमः। स्नानीयं जलं समर्पयामि। (जलसे स्नान कराये।)

पंचामृतस्नान—

पयोदधिघृतं चैव मधुशर्करयान्वितम्। पंचामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम्॥

श्रीमन्नारायणाय नमः। पंचामृतस्नानं समर्पयामि। (पंचामृतसे स्नान कराये।)

शुद्धोदकस्नान—

शुद्धं यत्सलिलं दिव्यं गङ्गाजलसमं स्मृतम्। समर्पितं मया भक्त्या शुद्धस्नानाय गृह्यताम्॥

श्रीमन्नारायणाय नमः। शुद्धोदकस्नानं समर्पयामि। (शुद्ध जलसे स्नान कराये।)

वस्त्र—

शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम्। देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे॥

श्रीमन्नारायणाय नमः। वस्त्रं समर्पयामि, आचमनीयं जलं च समर्पयामि। (वस्त्र चढ़ाये, पुनः आचमनीय जल दे।)

उपवस्त्र—

उपवस्त्रं प्रयच्छामि देवाय परमात्मने। भक्त्या समर्पितं देव प्रसीद परमेश्वर॥

श्रीमन्नारायणाय नमः। उपवस्त्रं समर्पयामि, आचमनीयं जलं च समर्पयामि। (उपवस्त्र चढ़ाये तथा आचमनीय जल समर्पित करे।)

यज्ञोपवीत—

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

श्रीमन्नारायणाय नमः। यज्ञोपवीतं समर्पयामि, यज्ञोपवीतान्ते आचमनीयं जलं च समर्पयामि। (यज्ञोपवीत अर्पण करे, पुनः आचमनीय जल दे।)

गन्ध—

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥

श्रीमन्नारायणाय नमः। चन्दनं समर्पयामि। (मलय-चन्दन चढ़ाये।)

(शालग्रामपर अक्षत नहीं चढ़ाया जाता। अतः अक्षतके स्थानपर श्वेत तिल या तुलसीपत्र चढ़ाये।)

अक्षत—श्रीमन्नारायणाय नमः। अक्षतस्थाने श्वेततिलान् समर्पयामि। (श्वेत तिल चढ़ाये।)

पुष्प—

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो। मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥

श्रीमन्नारायणाय नमः। पुष्पं पुष्पमालां च समर्पयामि। (पुष्प और पुष्पमालासे अलंकृत करे।)

तुलसीपत्र—

तुलसीं हेमरूपां च रत्नरूपां च मञ्जरीम्। भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम्॥

श्रीमन्नारायणाय नमः। तुलसीदलं तुलसीमञ्जरीं च समर्पयामि। (तुलसीदल तथा तुलसीमंजरी अर्पित करे।)

दूर्वा—

दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान्। आनीतांस्तव पूजार्थं गृहाण परमेश्वर॥

श्रीमन्नारायणाय नमः। दूर्वाङ्कुरान् समर्पयामि। (दूब समर्पित करे।)

धूप—

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

श्रीमन्नारायणाय नमः। धूपमाघ्रापयामि। (धूप आघ्रापित करे।)

दीप—

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥

श्रीमन्नारायणाय नमः। दीपं दर्शयामि। (घृतदीप दिखाये तथा हाथ धो ले।)

नैवेद्य—

त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये। गृहाण सुमुखो भूत्वा प्रसीद परमेश्वर॥

श्रीमन्नारायणाय नमः। नैवेद्यं निवेदयामि, मध्ये पानीयं जलं समर्पयामि, आचमनीयं जलं च समर्पयामि। (नैवेद्य निवेदित करे तथा पानीय जल अर्पित करे, पुनः आचमनीय जल अर्पित करे।)

अखण्ड ऋतुफल—

इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥

श्रीमन्नारायणाय नमः। अखण्डऋतुफलं समर्पयामि। (अखण्ड ऋतुफल समर्पित करे।)

ताम्बूल—

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्। एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

श्रीमन्नारायणाय नमः। एलालवङ्गपूगीफलयुतं ताम्बूलं समर्पयामि। (इलायची, लवंग तथा पूगीफलयुक्त ताम्बूल अर्पित करे।)

दक्षिणा—

दक्षिणा प्रेमसहिता यथाशक्तिसमर्पिता। अनन्तफलदामेनां गृहाण परमेश्वर॥

श्रीमन्नारायणाय नमः। द्रव्यदक्षिणां समर्पयामि। (द्रव्य-दक्षिणा अर्पित करे तथा आरती करे।)

स्तुति-प्रार्थना—

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥

शंख-जल—

शङ्खमध्यस्थितं तोयं भ्रामितं केशवोपरि। अङ्गलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति॥

शंखका जल भगवान्‌पर घुमाकर अपने ऊपर छोड़े।

पुष्पांजलि—

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च। पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर॥

श्रीमन्नारायणाय नमः। पुष्पाञ्जलिं समर्पयामि। (भगवान्‌को पुष्पांजलि समर्पित करे।)

प्रदक्षिणा—

यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिणा* पदे पदे॥

श्रीमन्नारायणाय नमः। प्रदक्षिणां समर्पयामि। (भगवान्‌की प्रदक्षिणा कर उन्हें साष्टांग प्रणाम करे, तदनन्तर क्षमा-प्रार्थना करे।)

क्षमा-प्रार्थना—

यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्। तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर॥

चरणामृतग्रहण— भगवान्‌के पूजनके अन्तमें मरणासन्नको चरणोदक पिलाना चाहिये तथा सभी लोगोंको लेना चाहिये।

अन्तिम समयमें मरणासन्नको गीता, रामायण, भागवत आदिका पाठ सुनाना चाहिये और उच्चस्वरमें भगवन्नामकीर्तन करना चाहिये, जिससे कीर्तनकी ध्वनि मरणासन्नके कानमें पहुँच सके और वह उसकी सद्गतिमें सहायक बने।

---

* आर्षत्वात्सुपो लुक्।

देह-त्यागके बादके कृत्य

तात्कालिक कार्य

मृत्यु हो जानेके बाद मृत प्राणीके कल्याणके कार्योंमें जुट जाना चाहिये। सर्वप्रथम मृत प्राणीकी अन्त्येष्टिसे सम्बन्धित निम्नलिखित सामग्रियाँ जुटा लेनी चाहिये—

(क) शव-सम्बन्धित सामग्री

(१) अर्थी बनानेके लिये बाँस आदि, अर्थीपर बिछानेके लिये कुशासन अथवा चटाई।

(२) सफेद नया कपड़ा मलमलका लगभग २० मीटर [अर्थीपर बिछानेके लिये तथा शवको ढकनेके लिये ५ मीटर, शवको पहनानेके लिये २ मीटर, आधे मीटरमें लंगोटी। शेष कपड़ेमें दाहकर्ताकी दो धोती, दो गमछा तथा दो लंगोटी]।

(३) सौभाग्यवती स्त्रीके शवको पहनानेके लिये चुनरी और ढकनेके लिये गोटेसहित रंगीन ओढ़नी, अलंकृत करनेके लिये सौभाग्यद्रव्य (सिन्दूर, चूड़ी, मेंहदी आदि)।

(४) शव बाँधनेके लिये मूँजकी रस्सी, साथमें मौली अथवा कच्चा सूत। (सौभाग्यवती स्त्रीके शवको बाँधनेके लिये मौली तथा पुरुषोंके लिये सूतकी विधि है।)

(५) शवको ओढ़ानेके लिये रामनामी चद्दर अथवा सफेद चद्दर।

(६) अर्थी सजानेके लिये पुष्प एवं पुष्पमाला, (७) अबीर-बुक्का, (८) इत्र, (९) रूई, (१०) धूपबत्ती, (११) दियासलाई, (१२) मिट्टीका घड़ा (जल लानेके लिये), (१३) मिट्टीकी नदिया अथवा थाली (पिण्ड रखनेके लिये), (१४) लोटा, (१५) यज्ञोपवीत दो जोड़ा।

(१६) लोकाचार आदिके अनुसार शवकी परिक्रमाके लिये नारियल तथा गरीगोला (पुरुषोंके लिये नारियल, स्त्रियोंके लिये गरीगोला)।

(१७) शवके ऊपरसे उछालनेके लिये रजतखण्ड, सिक्के, रूई, धानका लावा, रुपये, श्वेत पुष्प आदि (अपने देशाचारके अनुसार)।

(ख) पिण्डदानकी सामग्री

(१) जौका आटा—आधा किलो, (२) तिल—१०० ग्राम, (३) मधु, (४) गोघृत, (५) कुश, (६) सफेद पुष्प, (७) पलाशका पत्तल।

(ग) दाह-संस्कारकी सामग्री

(१) शुद्ध देशी घी—सामर्थ्यानुसार

(२) कर्पूर

(३) राल

(४) चन्दनकी लकड़ी तथा चन्दनचूरा—सामर्थ्यानुसार

(५) पीपल, तुलसी, बेल इत्यादिकी लकड़ी

(६) चिताके लिये लकड़ी—ढाई कुन्तल अथवा शवके अनुसार न्यूनाधिक

(७) चिताभूमिपर जीवकी शान्तिके लिये गोदुग्ध (सामर्थ्यानुसार लगभग पावभर या एक लीटरतक।)

क्षौर तथा स्नानका संकल्प

साधनसम्पन्न हो जानेपर अधिकारी त्रिकुश, तिल और जल लेकर स्वयं बाल बनवाने और स्नानके लिये संकल्प करे—

प्रतिज्ञा-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः नमः परमात्मने पुरुषोत्तमाय ॐ तत्सत् अद्यैतस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे बौद्धावतारे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे ....क्षेत्रे (यदि काशी हो तो **अविमुक्तवाराणसीक्षेत्रे आनन्दवने गौरीमुखे त्रिकण्टकविराजिते महाश्मशाने भगवत्या उत्तरवाहिन्या भागीरथ्या गङ्गाया वामभागे**) **....संवत्सरे उत्तरायणे/दक्षिणायने ....ऋतौ ....मासे ....पक्षे ....तिथौ ....वासरे ....गोत्रः ....शर्मा/वर्मा/ गुप्तोऽहम् ....गोत्रस्य (....गोत्रायाः) ....प्रेतस्य (....प्रेतायाः) और्ध्वदैहिकसंस्कारयोग्यतासम्पादनार्थं क्षौरपूर्वकं स्नानकर्म करिष्ये।**

—ऐसा संकल्प कर दक्षिणाभिमुख बैठकर क्षौरकर्म कराये।[१] फिर स्नानकर नये वस्त्र और उपवस्त्र धारण करे।

शवका संस्कार

इस तरह पवित्र होकर मृत प्राणीके पास आये। शवका सिरहाना उत्तर अथवा पूर्वकी ओर करनेका वचन है, किंतु परम्परासे उत्तरकी ओर सिरहाना करना प्रशस्त है।[२] स्नान करानेके लिये नये घड़ेमें जल भरकर उसमें तीर्थोंका इस प्रकार आवाहन करे[३]—

गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः।
कुरुक्षेत्रं च गङ्गा च यमुना च सरिद्वरा॥
कौशिकी चन्द्रभागा च सर्वपापप्रणाशिनी।
नन्दा भद्राऽवकाशा च गण्डकी सरयूस्तथा॥
भैरवं च वराहं च तीर्थं पिण्डारकं तथा।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा।
प्रेतस्यास्य विशुद्ध्यर्थमस्मिंस्तोये विशन्तु वै॥

फिर इसी आवाहित जलसे शवको स्नान कराये। नये वस्त्रोंसे अंगोंको पोंछकर गोघृतका लेप करे। नया वस्त्र (कौपीन) पहना दे। द्विज हो तो नया यज्ञोपवीत भी पहना दे। चन्दन लगा दे। फूल और तुलसीकी माला पहना दे। कर्पूर, अगर, कस्तूरी आदि सुगन्धित द्रव्योंसे सारे शरीरमें लेप कर दे। मुख, दोनों आँखों, दोनों नासाछिद्रों, दोनों कानोंमें सोना डाल दे।[४] सुवर्णके अभावमें घीकी बूँद डाल दे।[५] कपड़ेसे पैरकी

---

१. राजस्थान आदि कुछ स्थानोंमें देशाचारके अनुसार जिन कुटुम्बीजनोंके पिता मर चुके हैं तथा जो मृत व्यक्तिसे अवस्थामें छोटे हैं, उनका भी मुण्डन करनेकी परम्परा है।

२. 'प्राक् शिरसं उदक् शिरसं वा भूमौ निवेशयेत्।' (पारस्करगृह्यसूत्रमें हरिहरभाष्य)
'ततो नीत्वा श्मशानेषु स्थापयेदुत्तरामुखम्।' (गरुडपुराण)
एक वचन यह भी है कि '**दक्षिणशिरसं कृत्वा सचैलं तु शवं तथा**'। इसमें शवको दक्षिणकी ओर सिर करके लिटानेको लिखा गया है। यह नियम सामवेदियोंके लिये है। अन्य लोगोंको तो उत्तरकी ओर ही सिर रखना चाहिये और उत्तान ही लिटाना चाहिये—**सामेतरेषामुत्तरशिरस्त्वम्।** (श्राद्धतत्त्व)

३. तीर्थस्याऽऽवाहनं कृत्वा स्नानं तत्र कारयेत्। (वीरमित्रोदय)

४. (क) घृतेनाऽभ्यक्तमाप्लाव्य शुद्धवस्त्रोपवीतिनम्। चन्दनोक्षितसर्वाङ्गं सुमनोभिर्विभूषयेत्॥
हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु। मुखेष्वथाभिधायैनं निर्हरेयुः सुतादयः॥ (निर्णयसिन्धु)
(ख) एका वक्त्रे च दातव्या घ्राणयुग्मे तथा पुनः। अक्ष्णोश्च कर्णयोश्चैव द्वे द्वे देये यथाक्रमम्॥ (ग० पु०, प्रेतखण्ड १५।९)

५. 'सुवर्णस्याप्यभावे तु आज्यं ज्ञेयं विचक्षणैः॥' (निर्णयसिन्धु)

अंगुलियोंसे लेकर सिरतक सारे शरीरको अच्छी तरह ढँक दे। तलवा खुला रखे। इस तरह शवको अलंकृत कर अर्थीपर कुश या कुशासन बिछाकर उत्तरकी ओर सिर करके लेटा दे। मूँजकी नयी रस्सीके साथ मौली या कच्चे सूतकी रस्सीसे अच्छी तरह बाँध दे। ऊपरसे रामनामी चद्दर या सफेद चद्दर ओढ़ा दे। पुष्पमालाओंसे अलंकृत कर दे।[१]

शवको रजस्वला एवं शूद्रवर्ण आदिके स्पर्शसे बचाना चाहिये। इनके स्पर्शसे शवको शुद्ध करना पड़ता है। यदि शुद्धि न की गयी तो संस्कर्ता तथा मृत व्यक्ति दोनोंको नरक जाना पड़ता है।[२] शूद्रादिसे तृण, लकड़ी, तिल, घी आदि भी नहीं मँगाना चाहिये।[३]

---

१. वृद्ध व्यक्तियोंके शववाहन (अर्थी)-को लोकाचारानुसार झण्डी आदिसे वैकुण्ठीके रूपमें सजाना चाहिये तथा शंख, घड़ियाल, घंटा आदि वाद्यसामग्रियोंके द्वारा भगवन्नाम-संकीर्तनके साथ शवयात्रा करनी चाहिये।

२. **श्मशाने नीयमानशवस्य शूद्रस्पर्शे शूद्रेण वहने वा ''''सूतिकारजस्वलयोः स्पर्शेऽप्येवमेव प्रायश्चित्तम्''''। प्रायश्चित्तं विना दाहादिकृतं व्यर्थं भवेत्। उभयोश्च नरकः।** (धर्मसिन्धु, उत्तरार्ध, परिच्छेद ३)

३. '**शूद्राऽऽनीतैः कृतं कर्म सर्वं भवति निष्फलम्।**' (धर्मसिन्धु)

श्राद्ध-प्रयोग-विधि

मलिनषोडशी

मृत्युस्थानसे लेकर अस्थिसंचयनतक छः पिण्ड तथा दशगात्रके दस पिण्डोंको मिलाकर सोलह पिण्डदान होता है। अशौचकालका यह पिण्डदान 'मलिनषोडशी' कहलाता है।

पिण्ड-निर्माण तथा षट्पिण्डदान

अर्थीकी दाहिनी तरफ दक्षिणकी ओर मुँहकर बैठ जाय। शिखा बाँध ले। अपसव्य[1] होकर तिल और घीको जौके आटेमें मिलाकर छः[2] पिण्ड बनाये। प्रारम्भसे लेकर श्मशानतकके लिये छः पिण्ड बनाये जाते हैं। जौके आटेके अभावमें चावल आदिके आटेसे भी पिण्डदान किया जा सकता है। थोड़ा जौका आटा आदि बचा ले।

पहले षट्पिण्डदानकी विधि दी जा रही है—

१. शवनिमित्तक[3] पहला पिण्डदान

अपसव्य हो जाय। दायें हाथमें त्रिकुश, तिल और जल लेकर शवनिमित्तक प्रथम पिण्डके दानका मृति (मृत्यु)-स्थानपर प्रतिज्ञा-संकल्प करे—

पिण्डाधार कुशों तथा उल्मुकको अन्य अग्निमें छोड़ दे।

दक्षिणादानका संकल्प—सव्य पूर्वाभिमुख होकर हाथमें त्रिकुश, तिल, जल तथा रजतदक्षिणा लेकर संकल्प करे—

ॐ अद्य ....गोत्रः ....शर्मा/वर्मा/गुप्तोऽहम् ....गोत्राणामस्मत्पितृपितामहप्रपितामहानाम् ....शर्मणां/

वर्मणां/गुप्तानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां ....द्वितीयगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् ....शर्मणां/वर्मणां/गुप्तानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामथ च अन्येषां विविधगोत्राणां विविधनामधेयानां बान्धवादीनां ....तीर्थे कृतैतत्तीर्थश्राद्धप्रतिष्ठार्थमेतानि रजतखण्डानि (रजतनिष्क्रयद्रव्यं वा) ....गोत्राय ब्राह्मणाय भवते सम्प्रददे। कहकर हाथका जल तथा दक्षिणा उपस्थित ब्राह्मणको दे दे अथवा ब्राह्मणोंको विभाजित कर देना हो तो '**नानानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दातुमुत्सृज्ये**' कहकर दक्षिणाद्रव्य पिता आदिके आसनपर रख दे। भोजनके अन्तमें दे।

पितृगायत्रीका पाठ— निम्न पितृगायत्रीमन्त्रका तीन बार पाठ करे—

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥

रक्षादीपनिर्वापण—अपसव्य दक्षिणाभिमुख होकर रक्षादीप बुझाये। सव्य होकर हाथ-पैर धो ले।

आचार्यको दक्षिणादान—सव्य पूर्वाभिमुख होकर त्रिकुश, तिल, जल हाथमें लेकर दक्षिणादानका संकल्प करे—

ॐ अद्य ....गोत्रः शर्मा/वर्मा/गुप्तोऽहम् ....गोत्राणामस्मत्पितृपितामहप्रपितामहानां ....शर्मणां/वर्मणां/गुप्तानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा च द्वितीयगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां ....शर्मणां/वर्मणां/गुप्तानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामथ च अन्येषां बान्धवादीनां तीर्थश्राद्धसाङ्गता-सिद्ध्यर्थमाचार्याय इमां दक्षिणां भवते सम्प्रददे। कहकर आचार्यको दक्षिणा प्रदान करे।

आचार्य बोले—**ॐ स्वस्ति।**

न्यूनातिरिक्तदोषपरिहारार्थ गोदानका संकल्प—दाहिने हाथमें गोनिष्क्रयद्रव्य तथा त्रिकुश, तिल, जल लेकर इस प्रकार संकल्प करे—

ॐ अद्य ....गोत्रः ....शर्मा/वर्मा/गुप्तोऽहम् ....गोत्राणामस्मत्पितृपितामहप्रपितामहानां ....शर्मणां/वर्मणां/गुप्तानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा च द्वितीयगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामथ च अन्येषां बान्धवादीनां ....तीर्थे कृतैतत् तीर्थश्राद्धप्रतिष्ठार्थं न्यूनातिरिक्तदोषपरिहारार्थं च गोनिष्क्रयद्रव्यं ....गोत्राय ....शर्मणे ब्राह्मणाय भवते सम्प्रददे। ऐसा कहकर यथाशक्ति कुछ द्रव्य ब्राह्मणको दे दे।

भोजनदानका संकल्प—दाहिने हाथमें त्रिकुश, तिल, जल लेकर संकल्प करे—

ॐ अद्य ....गोत्रः ....शर्मा/वर्मा/गुप्तोऽहम् ....गोत्राणामस्मत्पितृपितामहप्रपितामहानां सपत्नीकानां तथा च द्वितीयगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामथ च अन्येषां बान्धवानां ....तीर्थे तीर्थश्राद्धप्रतिष्ठार्थं यथासंख्याकान् ब्राह्मणान् भोजयिष्ये, आमान्नदानं वा करिष्ये, तेभ्यो दक्षिणादिकं च दातुं प्रतिजाने। कहकर संकल्पजल छोड़ दे।

कर्मका समर्पण—**अनेन कृतेन तीर्थश्राद्धेन पितृरूपीजनार्दनः प्रीयताम्, न मम।** कहकर जल छोड़ दे।

भगवत्स्मरण—निम्न मन्त्रोंसे प्रार्थना करे—

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
यत्पादपङ्कजस्मरणाद् यस्य नामजपादपि। न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम्॥

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।

ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः।

॥ तीर्थश्राद्ध पूर्ण हुआ॥

परिशिष्ट

पंचकशान्तिकी सामग्री

(क) पूजन-सामग्री—

(१) गंगाजल अथवा शुद्ध जल
(२) सफेद चन्दन—१ कटोरी (घिसा हुआ)
(३) रोली—१० ग्राम
(४) मौली—१ गोला
(५) अबीर-बुक्का—१० ग्राम
(६) पान—२० नग
(७) सुपारी—५० नग
(८) रूई—१० ग्राम
(९) धूप—१ पैकेट
(१०) गोघृत—२०० ग्राम (दीपकके लिये)
(११) दियासलाई—१ नग
(१२) कपूर—१० ग्राम
(१३) लौंग-इलायची—२०-२० नग
(१४) चावल—२ किलो
(१५) सिन्दूर—५ ग्राम
(१६) जनेऊ—१५ नग
(१७) हल्दी चूर्ण—१० ग्राम
(१८) नारियल (जलदार)—७ (कलशके ऊपर रखनेके लिये)
(१९) गरी गोला—१ नग
(२०) साबूत काला उड़द—२५० ग्राम
(२१) सर्वौषधि या शतावर—५० ग्राम
(२२) सप्तधान्य—५०० ग्राम (कलशके नीचे रखने और दान करनेके लिये)
(२३) पंचामृत—१ कटोरी
(२४) पंचगव्य—१ कटोरी
(२५) फूलकी माला—१५ नग
(२६) पुष्प, तुलसीपत्र, बिल्वपत्र
(२७) दूर्वा
(२८) पंचपल्लव
(२९) नैवेद्य (पेड़ा-मिसरी आदि)—२० नग
(३०) ऋतुफल—२० नग
(३१) कुशा—२० नग
(३२) ताँबा, पीतल या मिट्टीके ढक्कनसहित कलश—७
(३३) कलशपर चढ़ानेके लिये धोती—७, गमछा—७
(३४) काँसेका घीसे भरा कटोरा (दान करनेके लिये)
(३५) स्वर्णखण्डसहित तिलसे भरा ताँबेका पंचपात्र (दान करनेके लिये)
(३६) सोनेकी प्रतिमा—६ [धनिष्ठा आदि नक्षत्रोंकी पाँच तथा महामृत्युंजयकी एक (सामर्थ्यानुसार कुश अथवा सुपारीपर भी पूजन हो सकता है।)]
(३७) कलशोंमें डालनेके लिये पंचरत्न
(३८) कमण्डलु—१ (दान करनेके लिये)
(३९) काला कपड़ा—१ मीटर (दान तथा पूजनके लिये)
(४०) दही—५० ग्राम
(४१) गोमय

(ख) हवन-सामग्री—

(१) काला तिल—२ किलो
(२) चावल—१ किलो
(३) जौ—आधा किलो
(४) चीनी—२५० ग्राम
(५) घी—आधा किलो
(६) आमकी लकड़ी—५ किलो
(७) गोहरी—१५ नग
(८) पलाशकी लकड़ी—५०० ग्राम
(९) पूर्णपात्र (पीतलका भगौना) चावलसे भरा हुआ
(१०) आज्यस्थाली—काँसेका कटोरा
(११) चरुपात्र (खीरके लिये)
(१२) स्रुवा, प्रणीता, प्रोक्षणी (यज्ञपात्र)
(१३) नवग्रहकी लकड़ी (मदार, पलाश, खैर, चिचिड़ा, पीपल, गूलर, शमी, दूर्वा तथा कुश)

(ग) आचार्य तथा ब्राह्मणवरण-सामग्री—

(अपने सामर्थ्यानुसार केवल द्रव्यसे भी वरण किया जा सकता है।)

(१) धोती—६ नग
(२) गमछा—६ नग
(३) लोटा—६ नग
(४) आसन—६ नग
(५) पंचपात्र—६ नग
(६) आचमनी—६ नग
(७) जनेऊ—६ नग
(८) सुपारी—६ नग
(९) माला—६ नग
(१०) जपमाली—६ नग
(११) बैठनेके लिये कम्बलका आसन

पंचकशान्ति

धनिष्ठाका उत्तरार्ध, शतभिषा, पूर्वाभाद्रपद, उत्तराभाद्रपद तथा रेवती—इन पाँच नक्षत्रोंको पंचक कहते हैं। इन पाँच नक्षत्रोंमें मृत्यु होनेपर दोषनिवारणार्थ शान्ति करनेका विधान है, जिसे पंचकशान्ति कहा जाता है। निर्णयसिन्धु और धर्मसिन्धुके आधारपर विशेष बात यह बतायी गयी है कि यदि मृत्यु पंचकके पूर्व हो गयी हो और दाह पंचकमें होना हो तो पुत्तलदाहका विधान (पुत्तलदाह) करे[१], शान्तिकर्म करनेकी आवश्यकता नहीं रहती। इसके विपरीत यदि पंचकमें मृत्यु हो गयी हो और दाह पंचकके बाद हुआ हो तो पंचकशान्तिकर्म करना चाहिये।[२] यदि मृत्यु भी पञ्चकमें हुई हो और दाह-कर्म भी पंचकमें हुआ हो तो पुत्तलदाह तथा शान्ति—दोनों कर्म करे। पंचकशान्ति इसलिये भी आवश्यक है कि इसका प्रभाव पारिवारिक लोगोंपर भी पड़ता है। पंचकशान्ति सूतकान्तमें बारहवें दिन, तेरहवें दिन या धनिष्ठा आदि पाँच नक्षत्रोंमें करनी चाहिये।

पंचकशान्ति-प्रयोगविधि

क्रियाकर्ता स्नानादिसे शुद्ध होकर अपने आसनपर पूर्वाभिमुख बैठ जाय।

शिखाबन्धन—गायत्रीमन्त्रसे शिखाबन्धन कर ले।

सिंचन-मार्जन—निम्न मन्त्रसे अपने ऊपर तथा श्राद्धीय वस्तुओंपर जल छिड़के—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु।

पवित्रीधारण—निम्न मन्त्रसे पवित्री पहन ले—

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥

आचमन—**ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः**—इन मन्त्रोंको बोलकर आचमन करे। तदनन्तर **ॐ हृषीकेशाय नमः**—कहकर हाथ धो ले।

प्राणायाम—प्राणायाम करे।

रक्षादीप-प्रज्वालन—पूर्व दिशामें घृतका पूर्वाग्र रक्षादीप जलाकर उसे तिल या अक्षतोंपर रख ले। गन्ध, अक्षत, पुष्प आदिसे दीपकका पूजन कर ले और प्रार्थना करे—

भो दीप ब्रह्मरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत्। यावत् कर्मसमाप्तिः स्यात् तावत् त्वं सुस्थिरो भव॥

सर्वप्रथम आचार्यका वरण कर ले।

तदनन्तर किसी पात्रमें अष्टदलकमल बनाकर गणेश-गौरीकी प्रतिमा स्थापित करे। यदि गणेशाम्बिकाकी मूर्ति न हो तो सुपारीमें मौली लपेटकर गणेशजीकी प्रतिमा बना ले तथा गोमयकी अम्बिका (गौरी)-की प्रतिमा बनाकर उसे पात्रमें रख ले और हाथमें अक्षत-पुष्प लेकर स्वस्तिवाचन करे—

स्वस्त्ययन

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो

---

१. पुत्तलदाहकी विधि पृ०सं० १०२ में दी गयी है।

२. नक्षत्रान्तरे मृतस्य पंचके दाहप्राप्तौ पुत्तलविधिरेव न शान्तिकम्। पंचकमृतस्याश्विन्यां दाहप्राप्तौ शान्तिकमेव न पुत्तलविधिः। (धर्मसिन्धु, उ० परि ३)

बृहस्पतिर्दधातु॥ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाᳬंसस्तनूभिर्व्यशेमहि देवहितं यदायुः॥ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पंच जना अदितिर्जातमदितिर्जनित्वम्॥ द्यौः शान्तिरन्तरिक्षᳬं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वᳬं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ यतो यतः समीहसे ततो नो अभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः॥ सुशान्तिर्भवतु॥

श्रीमन्महागणाधिपतये नमः। लक्ष्मीनारायणाभ्यां नमः। उमामहेश्वराभ्यां नमः। वाणीहिरण्यगर्भाभ्यां नमः। शचीपुरन्दराभ्यां नमः। मातृपितृचरणकमलेभ्यो नमः। इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः। स्थानदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः। ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे संकटे चैव विघ्नस्तस्य न जायते॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥
विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्। वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम्॥
वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥
गणेशाम्बिकाभ्यां नमः॥

हाथमें लिये अक्षत-पुष्पको गणेशजी एवं अम्बिकापर चढ़ा दे। इसके बाद दाहिने हाथमें त्रिकुश, जल, अक्षत और पुष्प लेकर प्रतिज्ञा-संकल्प करे—

प्रतिज्ञा-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः नमः पुराणपुरुषोत्तमाय ॐ तत्सत् अद्यैतस्य अचिन्त्यशक्तेर्महाविष्णोराज्ञया जगत्सृष्टिकर्मणि प्रवर्तमानस्य परार्द्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशान्तर्गते प्रजापतिक्षेत्रे ....स्थाने (काशीमें करना हो तो **अविमुक्तवाराणसीक्षेत्रे गौरीमुखे त्रिकण्टकविराजिते महाश्मशाने आनन्दवने भगवत्या भागीरथ्या गङ्गायाः पश्चिमे भागे) बौद्धावतारे ....संवत्सरे ....अयने ....ऋतौ ....मासे ....पक्षे ....तिथौ ....वासरे एवं ग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ....गोत्रः ....शर्मा/वर्मा/गुप्तोऽहम् ....गोत्रस्य ....शर्मणः/वर्मणः/गुप्तस्य धनिष्ठादिपञ्चनक्षत्रान्तर्गत- ....नक्षत्राधिकरणकदुर्मरणजनितदोषोपशान्त्यर्थं मम गृहे सर्वेषां जनानां दीर्घायुरारोग्यसुखप्राप्त्यर्थं ब्रह्माण्डपुराणोक्तां पञ्चकनिधनशान्तिं यथाविधि करिष्ये। तत्पूर्वाङ्गत्वेन कलशस्थापनपूजनं वरुणपूजनं पुण्याहवाचनं ग्रहपूजनं च करिष्ये।** हाथका त्रिकुश, जल आदि पात्र (तष्टा)-में छोड़ दे।

पुनः त्रिकुश, जल और अक्षत लेकर बोले—**पञ्चकशान्तिकर्मणि निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं च करिष्ये।** त्रिकुश, जल और अक्षत छोड़ दे।

गणेशाम्बिका-पूजन

भगवान् गणेशका आवाहन—

ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥

ॐ गणपतये नमः, गणपतिमावाहयामि, स्थापयामि, पूजयामि च।

भगवती गौरीका आवाहन—

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥

ॐ गौर्यै नमः, गौरीमावाहयामि, स्थापयामि, पूजयामि च।

प्राण-प्रतिष्ठा—

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च। अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

गौरी-गणेशपर अक्षत-पुष्प छोड़े—**गणेशाम्बिके सुप्रतिष्ठिते वरदे भवेताम्।**

आसन-समर्पण—

विचित्ररत्नखचितं दिव्यास्तरणसंयुतम्। स्वर्णसिंहासनं चारु गृह्णीष्व सुरपूजित॥

ॐ गणेशाम्बिकाभ्यां नमः, आसनं समर्पयामि। (आसनके लिये अक्षत समर्पित करे)

पाद्य-समर्पण—ॐ गणेशाम्बिकाभ्यां नमः, पादयोः पाद्यं समर्पयामि। कहकर एक आचमनी पाद्य (जल) समर्पित करे।

अर्घ-समर्पण—ॐ गणेशाम्बिकाभ्यां नमः, हस्तयोरर्घं समर्पयामि। बोलकर गणेश-गौरीको अर्घ दे।

ॐ गणेशाम्बिकाभ्यां नमः, आचमनीयं जलं समर्पयामि। बोलकर एक आचमनी जल अर्पित करे।

स्नान—

मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम्। तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम्॥

ॐ गणेशाम्बिकाभ्यां नमः, स्नानीयं जलं समर्पयामि। बोलकर शुद्ध जलसे स्नान कराये।

पंचामृतस्नान—

पञ्चामृतं मयानीतं पयो दधि घृतं मधु। शर्करया समायुक्तं स्नानार्थं प्रतिगृह्यताम्॥

ॐ गणेशाम्बिकाभ्यां नमः, पञ्चामृतस्नानं समर्पयामि। बोलकर पंचामृतसे स्नान कराये।

शुद्धोदकस्नान—

गङ्गा च यमुना चैव गोदावरी सरस्वती। नर्मदा सिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम्॥

ॐ गणेशाम्बिकाभ्यां नमः, शुद्धोदकस्नानं समर्पयामि। कहकर शुद्ध जलसे स्नान कराये।

वस्त्र-समर्पण—

शीतवातोष्णसन्त्राणं लज्जाया रक्षणं परम्। देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे॥

ॐ गणेशाम्बिकाभ्यां नमः, वस्त्रं समर्पयामि। कहकर वस्त्र चढ़ाये और **आचमनीयं जलं समर्पयामि** कहकर आचमनीय जल समर्पित करे।

यज्ञोपवीत-अर्पण—ॐ गणेशाम्बिकाभ्यां नमः, यज्ञोपवीतं समर्पयामि। बोलकर यज्ञोपवीत समर्पित करे।

यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि बोलकर आचमनका जल अर्पित करे।

उपवस्त्र-समर्पण—**ॐ गणेशाम्बिकाभ्यां नमः, उपवस्त्रं समर्पयामि।** बोलकर उपवस्त्र चढ़ाये और '**आचमनीयं जलं समर्पयामि**' कहकर आचमनका जल अर्पित करे।

चन्दन-अर्पण—

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥

ॐ गणेशाम्बिकाभ्यां नमः, चन्दनानुलेपनं समर्पयामि। बोलकर चन्दन चढ़ाये।

अक्षत-समर्पण—**ॐ गणेशाम्बिकाभ्यां नमः, अक्षतान् समर्पयामि।** कहकर गणेश-गौरीपर अक्षत चढ़ाये।

पुष्पमाल्यार्पण—

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो। मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥

ॐ गणेशाम्बिकाभ्यां नमः, पुष्पमालां समर्पयामि। बोलकर पुष्पमाला समर्पित करे।

दूर्वांकुर-अर्पण—

दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान्। आनीतांस्तव पूजार्थं गृहाण गणनायक॥

ॐ गणेशाम्बिकाभ्यां नमः, दूर्वाङ्कुरान् समर्पयामि। बोलकर गणेशजीपर दूर्वा चढ़ाये।

सिन्दूर-अर्पण—

सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्द्धनम्। शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥

ॐ गणेशाम्बिकाभ्यां नमः, सिन्दूरं समर्पयामि। कहकर गौरीको सिन्दूर चढ़ाये।

अबीर-अर्पण—

नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम्। अबीरनामकं चूर्णं गन्धं चारु प्रगृह्यताम्॥

ॐ गणेशाम्बिकाभ्यां नमः, नानापरिमलद्रव्याणि समर्पयामि। कहकर अबीर चढ़ाये।

धूप-अर्पण—

ॐ गणेशाम्बिकाभ्यां नमः, धूपमाघ्रापयामि। कहकर धूप अर्पण करे।

दीपदान—

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥

ॐ गणेशाम्बिकाभ्यां नमः, दीपं दर्शयामि। हस्तप्रक्षालनम्। दीप दिखाये और हाथ धो ले।

नैवेद्य—नैवेद्य सामने रखकर निम्न मन्त्रसे निवेदित करे—

शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च। आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्॥

ॐ गणेशाम्बिकाभ्यां नमः, नैवेद्यं समर्पयामि। नैवेद्यान्ते आचमनीयं जलं समर्पयामि। बोलकर नैवेद्य अर्पण करे और चार आचमनी जल अर्पित करे।

करोद्वर्तन—**ॐ गणेशाम्बिकाभ्यां नमः, करोद्वर्तनार्थे चन्दनं समर्पयामि।** बोलकर दोनों हाथोंकी तर्जनी अँगुली और अँगूठेसे गौरी-गणेशपर चन्दन छिड़के।

ऋतुफल—**ॐ गणेशाम्बिकाभ्यां नमः, ऋतुफलं समर्पयामि। आचमनीयं जलं समर्पयामि।** बोलकर ऋतुफल अर्पण करे और आचमनीय जल अर्पित करे।

ताम्बूल-अर्पण—

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ॐ गणेशाम्बिकाभ्यां नमः, ताम्बूलं समर्पयामि। बोलकर इलायची, लौंग-सुपारीके साथ ताम्बूल अर्पित करे।

दक्षिणा—

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

ॐ गणेशाम्बिकाभ्यां नमः, कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि। बोलकर यथाशक्ति द्रव्य-दक्षिणा समर्पित करे।

आरती—

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम् । आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

ॐ गणेशाम्बिकाभ्यां नमः, आरार्तिकं समर्पयामि। आरती करे।

प्रदक्षिणा—

यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणा पदे पदे॥

ॐ गणेशाम्बिकाभ्यां नमः, प्रदक्षिणां समर्पयामि। प्रदक्षिणा करे।

पुष्पांजलि—

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च । पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर॥

ॐ गणेशाम्बिकाभ्यां नमः, पुष्पाञ्जलिं समर्पयामि। पुष्पांजलि अर्पित करे।

विशेषार्घ—ताम्रपात्रमें जल, चन्दन, अक्षत, फल, पुष्प, दूर्वा और दक्षिणा रखकर दोनों घुटनोंको जमीनपर लगा दे और दोनों हाथसे अर्घपात्रको सिरतक ले जाय तथा निम्न मन्त्रसे गणेशको अर्पित करे—

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक । भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥

द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो । वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद॥

अनेन सफलार्घ्येण वरदोऽस्तु सदा मम।

ॐ गणेशाम्बिकाभ्यां नमः, विशेषार्घं समर्पयामि। विशेषार्घ दे।

प्रार्थना

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥

नमो देव्यै महादेव्यै शिवायै सततं नमः । नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥

अनेन पूजनेन गणेशाम्बिके प्रीयेताम्, न मम।

कलशस्थापन एवं पूजन

भूमिपर चावल या कुङ्कुमसे अष्टदलकमल बनाकर दाहिने हाथसे भूमिका स्पर्श करे और मन्त्र बोले—

ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः॥

निम्न मन्त्रद्वारा अष्टदलकमलपर सप्तधान्य रखे—

ॐ ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तꣳ राजन् पारयामसि॥

सप्तधान्यपर कलश-स्थापन—निम्न मन्त्रद्वारा सप्तधान्यपर कलश स्थापित करे—

ॐ आ जिघ्र कलशं मह्या त्वा विशन्त्विन्दवः।
पुनरूर्जा नि वर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः॥

कलशमें जल—अब निम्न मन्त्रसे जल डाले—

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीद।

कलशमें चन्दन—निम्न मन्त्र पढ़कर चन्दन डाले—

ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत॥

कलशमें सर्वौषधि—निम्न मन्त्र पढ़कर सर्वौषधि डाले—

ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामहꣳ शतं धामानि सप्त च॥

कलशमें दूर्वा—निम्न मन्त्रसे दूब डाले—

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि। एवा नो दूर्वे प्र तनु सहस्रेण शतेन च॥

कलशपर पंचपल्लव—निम्न मन्त्रसे कलशपर पंचपल्लव रख दे—

ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम्॥

कलशमें कुश—निम्न मन्त्र पढ़कर कुशका पत्ता कलशमें छोड़े—

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥

कलशमें सप्तमृत्तिका—निम्न मन्त्रसे सप्तमृत्तिका छोड़े—

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः॥

कलशमें सुपारी—निम्न मन्त्रसे सुपारी छोड़े—

ॐयाः फलिनीर्या अफला अपुष्पा याश्चपुष्पिणीः ।बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः॥

कलशमें पंचरत्न—निम्न मन्त्रसे पंचरत्न छोड़े—

ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे॥

कलशमें द्रव्य—निम्न मन्त्रसे द्रव्य छोड़े—

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

कलशपर वस्त्रोपवस्त्र—निम्न मन्त्र पढ़ते हुए कलशको वस्त्र-उपवस्त्रोंसे लपेट दे—

ॐ सुजातो ज्योतिषा सह शर्मवरूथमाऽसदत्स्वः। वासो अग्ने विश्वरूपꣳसं व्ययस्व विभावसो॥

कलशपर पूर्णपात्र—ताँबेकी कटोरीमें चावल भरकर उसपर अष्टदलकमल बनाकर निम्न मन्त्रसे कलशपर रख दे—

ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत । वस्नेव विक्रीणावहा इषमूर्जꣳशतक्रतो॥

कलशपर नारियल—अब निम्न मन्त्रसे लाल वस्त्रमें लपेटे हुए नारियलको रखे—

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः॥

कलशपर वरुणादि देवताओंका आवाहन—हाथमें पुष्प-अक्षत लेकर निम्न मन्त्रसे वरुणादि देवताओंका आवाहन करे—

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः॥

ॐ अपां पतये वरुणाय नमः, वरुणमावाहयामि, स्थापयामि।

हाथमें अक्षत-पुष्प लेकर कलशपर निम्न मन्त्रोंसे देवताओंका आवाहन करे—

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः॥

प्रतिष्ठा—इसके बाद अपने हाथमें अक्षत-पुष्प लेकर निम्न मन्त्र पढ़ते हुए कलशपर छोड़े—

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमं दधातु।
विश्वे देवास इह मादयन्तामो३म्प्रतिष्ठ॥

कलशे वरुणाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवन्तु। ॐ वरुणाद्यावाहितदेवताभ्यो नमः। यह कहकर अक्षत-पुष्प कलशके पास छोड़ दे।

कलशपर देवपूजन

अक्षत लेकर देवताओंका आवाहन करे और आसन प्रदान करे—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आसनार्थे अक्षतान् समर्पयामि।**

अब निम्न रीतिसे पाद्य, अर्घ, स्नानीय जल, धूप, दीप तथा नैवेद्य आदि अर्पित करे—

पाद्य—**ॐ वरुणाद्यावाहितदिदेवताभ्यो नमः, पाद्यं समर्पयामि।** (जल चढ़ाये।)

अर्घ—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, अर्घं समर्पयामि।** (अर्घ निवेदित करे।)

आचमन—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आचमनीयं जलं समर्पयामि।** (आचमनके लिये जल चढ़ाये।)

स्नानजल—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, स्नानीयं जलं समर्पयामि।** (स्नानके लिये जल चढ़ाये।)

पंचामृतस्नान—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, पञ्चामृतस्नानं समर्पयामि।** (पंचामृत चढ़ाये।)

शुद्धोदकस्नान—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, शुद्धोदकस्नानं समर्पयामि।** (शुद्ध जल चढ़ाये।)

आचमन—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आचमनीयं जलं समर्पयामि।** (आचमनके लिये जल दे।)

वस्त्र—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, वस्त्रं समर्पयामि।** (वस्त्र अर्पित करे।)

आचमन—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आचमनीयं जलं समर्पयामि।** (आचमनके लिये जल दे।)

यज्ञोपवीत—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, यज्ञोपवीतं समर्पयामि।** (यज्ञोपवीत चढ़ाये।)

आचमन—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आचमनीयं जलं समर्पयामि।** (आचमनके लिये जल दे।)

उपवस्त्र—**ॐ वरुणाद्यावाहितदेवताभ्यो नमः, उपवस्त्रं समर्पयामि।** (उपवस्त्र चढ़ाये।)

आचमन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

गन्ध—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, गन्धं समर्पयामि। (गन्ध चढ़ाये।)

अक्षत—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, अक्षतान् समर्पयामि। (अक्षत चढ़ाये।)

पुष्प—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, पुष्पं पुष्पमालां च समर्पयामि। (पुष्प-पुष्पमाला चढ़ाये।)

धूप—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, धूपमाघ्रापयामि। (धूप दिखाये।)

दीप—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, दीपं दर्शयामि। (दीप दिखाये, हाथ धो ले।)

नैवेद्य—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, नैवेद्यं समर्पयामि। (नैवेद्य निवेदित करे।)

आचमन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

ऋतुफल—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, ऋतुफलं समर्पयामि। (अखण्ड ऋतुफल चढ़ाये।)

ताम्बूल—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, ताम्बूलं समर्पयामि। (सुपारी, इलाइची, लौंगसहित ताम्बूल चढ़ाये।)

आचमन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

द्रव्य-दक्षिणा—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, द्रव्यदक्षिणां समर्पयामि। (दक्षिणा चढ़ाये।)

प्रदक्षिणा—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, प्रदक्षिणां समर्पयामि। (प्रदक्षिणा करे।)

कलश-प्रार्थना—हाथमें पुष्प लेकर आवाहित वरुणादि देवताओंकी स्तुति करे—

देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय । सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥
पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक । पुण्याहवाचनं यावत् तावत् त्वं सुस्थिरो भव॥

हाथके पुष्प कलशपर चढ़ा दे।

पुण्याहवाचन—(बौधायनोक्त)

यजमान—ब्राह्मणोंका गन्ध-अक्षत आदिसे पूजन करके निम्न मन्त्र बोले और जल दे—

ॐ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्।
ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु नः॥ ॐ शिवा आपः सन्तु।

ब्राह्मण—**ॐ सन्तु शिवा आपः।**

यजमान—निम्न मन्त्रसे ब्राह्मणोंके हाथमें फूल दे—

ॐ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। सा मे वसतु वै नित्यं सौमनस्यं सदास्तु मे॥ ॐ सौमनस्यमस्तु।

ब्राह्मण—**अस्तु सौमनस्यम्।**

यजमान निम्न मन्त्रसे अक्षत दे—

ॐ अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशोबलम्।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम॥ ॐ अक्षतं चारिष्टं चास्तु।

ब्राह्मणवाक्य—**अस्त्वक्षतमरिष्टं च।**

यजमान—**ॐ गन्धाः पान्तु**—कहकर ब्राह्मणोंके हाथमें चन्दन लगाये।

ब्राह्मण—**सौमङ्गल्यं चास्तु।**

यजमान—**ॐ अक्षताः पान्तु**—कहकर अक्षत दे।

ब्राह्मण—**आयुष्यमस्तु।**

यजमान—**ॐ पुष्पाणि पान्तु**—कहकर फूल दे।

ब्राह्मण—**सौश्रियमस्तु।**

यजमान—**ॐ सफलताम्बूलानि पान्तु**—कहकर पान-सुपारी दे।

ब्राह्मण—**ऐश्वर्यमस्तु।**

यजमान—**ॐ दक्षिणाः पान्तु**—कहकर दक्षिणा दे।

ब्राह्मण—**बहुदेयं चास्तु।**

यजमान—**आपः पान्तु**—कहकर जल दे।

ब्राह्मण—**स्वर्चितमस्तु।**

यजमान (हाथ जोड़कर बोले)—**भो ब्राह्मणाः अस्य धनिष्ठापञ्चकशान्तिकर्मणः पुण्याहं भवन्तो ब्रुवन्तु।** (तीन बार बोले)

ब्राह्मण—**ॐ पुण्याहम्, ॐ पुण्याहम्, ॐ पुण्याहम्।**

यजमान—**भो ब्राह्मणाः अस्य धनिष्ठापञ्चकशान्तिकर्मणः कल्याणं भवन्तो ब्रुवन्तु।**

ब्राह्मण—**ॐ कल्याणम्, ॐ कल्याणम्, ॐ कल्याणम्।**

यजमान—**भो ब्राह्मणाः अस्य धनिष्ठापञ्चकशान्तिकर्मणः ऋद्धिं भवन्तो ब्रुवन्तु।**

ब्राह्मण—**ॐ कर्म ऋध्यताम्, ॐ कर्म ऋध्यताम्, ॐ कर्म ऋध्यताम्।**

यजमान—**भो ब्राह्मणाः अस्य धनिष्ठापञ्चकशान्तिकर्मणः स्वस्ति भवन्तो ब्रुवन्तु।**

ब्राह्मण—**ॐ स्वस्ति, ॐ स्वस्ति, ॐ स्वस्ति।**

यजमान—**भो ब्राह्मणाः अस्य धनिष्ठापञ्चकशान्तिकर्मणः श्रीरस्तु, इति भवन्तो ब्रुवन्तु।**

ब्राह्मण—**ॐ अस्तु श्रीः, ॐ अस्तु श्रीः, ॐ अस्तु श्रीः।**

दक्षिणा-संकल्प—दाहिने हाथमें त्रिकुश, जल, अक्षत, पुष्प तथा दक्षिणा रखकर संकल्प करे—

ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ·····गोत्रः ·····शर्मा/वर्मा/गुप्तोऽहम् अस्य पुण्याहवाचनकर्मणः साङ्गतासिद्ध्यर्थं पुण्याहवाचकेभ्यो ब्राह्मणेभ्य इमां दक्षिणां विभज्य सम्प्रददे। (ब्राह्मणोंको दक्षिणा प्रदान करे।)

वेदीनिर्माण तथा अग्निस्थापन

पूर्वकी ओर मिट्टी या बालूसे एक हाथ लम्बी-चौड़ी चार अंगुल ऊँची एक चतुष्कोण वेदी बनाये।

संकल्प—त्रिकुश, अक्षत, जल लेकर संकल्प करे— **ॐ अद्य ......गोत्रः ......शर्मा/वर्मा/गुप्तोऽहम् अस्मिन् पञ्चकशान्तिकर्मणि पञ्चभूसंस्कारपूर्वकं वरदनामाग्निस्थापनं करिष्ये।** संकल्प-जल छोड़ दे।

वेदी बनाकर पंच-भूसंस्कार करे। यथा—

(१) परिसमूहन— कुशैः परिसमुह्य तान् कुशान् ऐशान्यां परित्यज्य। पूर्वाग्र तीन कुशाओंसे दक्षिणसे उत्तरकी ओर वेदीको बुहारकर कुशोंको ईशानकोणकी ओर फेंक दे।

(२-३) उपलेपन तथा उल्लेखन—गोमयोदकाभ्यामुपलिप्य स्रुवेण कुशैर्वा त्रिरुल्लिख्य। गोबर और जलसे लीपकर कुश अथवा स्रुवके मूलसे वेदीपर दक्षिणोत्तरक्रमसे पूर्वाग्र प्रादेशमात्र तीन रेखाएँ खींचे।

(४) उद्धरण—उल्लेखनक्रमेणाऽनामिकाङ्गुष्ठाभ्यां मृद्मुद्धृत्य। दाहिने हाथकी अनामिका और अँगूठेसे उल्लेखनक्रमसे रेखाओंपरसे मिट्टी निकालकर बायें हाथपर रखकर दाहिने हाथसे फेंक दे।

(५) अभ्युक्षण—उदकेनाऽभ्युक्ष्य। वेदीको जल लेकर सींच दे।

अग्निस्थापन—अब काँसेके पात्रमें अग्नि लाकर उसमेंसे क्रव्याद नामकी थोड़ी अग्नि निकालकर वेदीके नैर्ऋत्यकोणपर रख दे। शेष अग्निको वेदीपर निम्न मन्त्रसे स्वाभिमुख स्थापित करे—**ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ२ आ सादयादिह॥ 'ॐ वरदनामाग्ने सुप्रतिष्ठितो वरदो भव'** कहकर अग्निपर अक्षत छोड़ दे।

ग्रह-स्थापन-पूजन

ईशानकोणमें किसी पीढ़ाके ऊपर वस्त्र बिछाकर उसपर नवग्रह-चक्र बनाये। फिर निम्न मन्त्रोंसे नवग्रहादि देवताओंका आवाहन, पूजन करे। अक्षत लेकर निम्न मन्त्रोंसे पृथक्-पृथक् ग्रहोंका आवाहन करे—

सूर्य— ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ अधिदेवताप्रत्यधिदेवतासहितं सूर्यमावाहयामि, स्थापयामि। मन्त्र पढ़कर अक्षत छोड़ दे।

चन्द्रमा—ॐ इमं देवा असपत्नꣳसुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा॥ अधिदेवताप्रत्यधिदेवतासहितं सोममावाहयामि, स्थापयामि। मन्त्र पढ़कर अक्षत छोड़ दे।

मंगल—ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाꣳ रेताꣳ सि जिन्वति॥

अधिदेवताप्रत्यधिदेवतासहितं भौममावाहयामि, स्थापयामि। मन्त्र पढ़कर अक्षत छोड़ दे।

बुध— ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳ सृजेथामयं च। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥

अधिदेवताप्रत्यधिदेवतासहितं बुधमावाहयामि, स्थापयामि। मन्त्र पढ़कर अक्षत छोड़ दे।

बृहस्पति—ॐ बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्।
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा॥

अधिदेवताप्रत्यधिदेवतासहितं बृहस्पतिमावाहयामि, स्थापयामि। मन्त्र पढ़कर अक्षत छोड़ दे।

शुक्र— ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥

अधिदेवताप्रत्यधिदेवतासहितं शुक्रमावाहयामि, स्थापयामि। मन्त्र पढ़कर अक्षत छोड़ दे।

शनि—ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः॥

अधिदेवताप्रत्यधिदेवतासहितं शनैश्चरमावाहयामि, स्थापयामि। मन्त्र पढ़कर अक्षत छोड़ दे।

राहु—

ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥

अधिदेवताप्रत्यधिदेवतासहितं राहुमावाहयामि, स्थापयामि। मन्त्र पढ़कर अक्षत छोड़ दे।

केतु—ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥

अधिदेवताप्रत्यधिदेवतासहितं केतुमावाहयामि, स्थापयामि। मन्त्र पढ़कर अक्षत छोड़ दे।

तदनन्तर निम्न मन्त्रोंको पढ़ते हुए पंचलोकपाल, वास्तोष्पति, क्षेत्रपाल तथा इन्द्रादि दस दिक्पालोंकी स्थापना करे और अक्षत छोड़े—

ॐ गणपत्यादिपञ्चलोकपालेभ्यो नमः, पञ्चलोकपालानावाहयामि, स्थापयामि।

ॐ वास्तोष्पतये नमः, वास्तोष्पतिमावाहयामि, स्थापयामि।

ॐ क्षेत्रपालाय नमः, क्षेत्रपालमावाहयामि, स्थापयामि।

ॐ इन्द्रादिदशदिक्पालेभ्यो नमः, दशदिक्पालानावाहयामि, स्थापयामि।

प्रतिष्ठा—अक्षत लेकर निम्न मन्त्रसे उक्त देवताओंकी प्रतिष्ठा करे—

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वे देवास इह मादयन्तामो३म्प्रतिष्ठ॥

अधिदेवताप्रत्यधिदेवतासहिताः सूर्यादिनवग्रहा गणपत्यादिपञ्चलोकपालवास्तोष्पतिक्षेत्रपालेन्द्रादिदश-दिक्पालाः सुप्रतिष्ठिता वरदा भवन्तु।

पूजन—गन्ध, पुष्प, धूप, दीप तथा नैवेद्य आदि उपचारोंसे नवग्रहादि देवोंका पूजन करे, तदनन्तर निम्न मन्त्रसे प्रार्थना करे—

ॐ ब्रह्मामुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु॥

पूजाके अन्तमें बोले—**अनेन यथालब्धोपचारपूजनेन सूर्याद्यनन्तान्तग्रहमण्डलदेवताः प्रीयन्ताम्, न मम।**

धनिष्ठादि नक्षत्र देवतापूजन

वेदीके ईशानकोणपर ग्रहपीठके उत्तरकी ओर पाँच कलशोंका तथा उनके उत्तर दिशामें एक कलश मृत्युञ्जय रुद्रके निमित्त भी स्थापित कर ले।[१] पाँच कलशोंपर धनिष्ठा आदि पाँच नक्षत्रोंके अधिदेवताओं[२] की स्थापनाके लिये स्वर्णकी प्रतिमा बनाकर अग्न्युत्तारणविधिसे उनकी प्राणप्रतिष्ठा आदि कर ले[३] तथा उन प्रतिष्ठित प्रतिमाओंको कलशोंपर स्थापित कर दे। सामर्थ्यानुसार कुश अथवा सुपारीपर भी पूजन हो सकता है।

कलशोंको पूर्व, पश्चिम, उत्तर, दक्षिण तथा मध्यमें स्थापित करे। पूर्वका कलश धनिष्ठा नक्षत्रके अधिष्ठाता वसु देवताओंका है। पश्चिमका कलश शतभिषा नक्षत्रके अधिष्ठाता वरुण देवताका है। इसी प्रकार उत्तर, दक्षिण तथा मध्यके कलश क्रमशः पूर्वाभाद्रपद नक्षत्रके स्वामी अजैकपाद्, उत्तराभाद्रपदके स्वामी अहिर्बुध्न्य तथा रेवतीके अधिष्ठाता पूषा देवताका है। स्थापित पाँच कलशोंपर निम्न रीतिसे वसु आदि देवताओंका आवाहन करे—

(१) वसुओंका आवाहन—हाथमें अक्षत लेकर निम्न मन्त्र पढ़कर पहले चतुष्कोणपर पूर्व दिशामें स्थापित कलशपर वसु देवताओंका आवाहन करे—

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥

ॐ भूर्भुवः स्वः धनिष्ठानक्षत्राधिष्ठातारो वसव इहागच्छत इह तिष्ठत ॐ वसुभ्यो नमः, वसून् आवाहयामि, स्थापयामि कहकर कलशपर स्थापित वसुओंकी प्रतिमापर अक्षत छोड़ दे।

(२) वरुणका आवाहन—पूर्वकी भाँति दूसरे चतुष्कोणपर रखे कलशपर स्थापित वरुणप्रतिमापर निम्न मन्त्र पढ़ते हुए अक्षत छोड़े—

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि ।
वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीद॥

ॐ भूर्भुवः स्वः वरुणाय नमः, वरुणमावाहयामि, स्थापयामि। (अक्षत छोड़ दे)

(३) अजैकपाद्का आवाहन—तीसरे चतुष्कोणके कलशपर स्थापित अजैकपाद्की प्रतिमापर निम्न मन्त्र पढ़ते हुए अक्षत छोड़े—

ॐ उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः।
विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु॥

ॐ भूर्भुवः स्वः अजैकपदे नमः, अजैकपदमावाहयामि, स्थापयामि।

(४) अहिर्बुध्न्यका आवाहन—चौथे चतुष्कोणके कलशपर स्थापित अहिर्बुध्न्यकी प्रतिमापर निम्न मन्त्र पढ़ते हुए आवाहन करे और अक्षत छोड़े—

---

१. पूर्वमें स्थापित कलशके समान इन छहों कलशोंको भी (पृ०सं० १४२ में दी हुई विधिके अनुसार) स्थापित कर ले।
२. धनिष्ठादि पाँच नक्षत्रोंके अधिष्ठातृ देवताओंके नाम इस प्रकार हैं—
वसवो वरुणश्चैव अजैकपात्तृतीयकम्। अहिर्बुध्न्यश्चतुर्थं च पूषाणं पञ्चमं तथा॥
३. अग्न्युत्तारण एवं प्राणप्रतिष्ठाकी विधि पृ०सं० १४४ में दी गयी है।

ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः॥

ॐ भूर्भुवः स्वः अहिर्बुध्न्याय नमः, अहिर्बुध्न्यमावाहयामि, स्थापयामि।

(५) पूषाका आवाहन—अन्तिम पंचम कलशपर स्थापित पूषाकी प्रतिमापर निम्न मन्त्रसे आवाहन करे और अक्षत छोड़े—

ॐ पूषन् तव व्रते वयं न रिष्येम कदा चन। स्तोतारस्त इह स्मसि॥

ॐ भूर्भुवः स्वः पूष्णे नमः, पूषाणमावाहयामि, स्थापयामि।

नक्षत्रदेवताओंका पूजन एवं प्रार्थना

आवाहनके अनन्तर गन्धाक्षतादि उपचारोंसे पाँचों देवताओंका पूजन तथा प्रार्थना करे—

(१) धनिष्ठा नक्षत्रके देवता वसु—'**ॐ वसुभ्यो नमः**' इस मन्त्रसे यथालब्धोपचार पूजन करे तथा निम्न प्रार्थना करे—

ॐ अधिष्ठातः धनिष्ठाया वसो तुभ्यं नमो नमः। मृतस्याऽस्य प्रसादात्ते सद्गतिः स्याच्छुभं च मे॥

(२) शतभिषा नक्षत्रके देवता वरुण—'**ॐ वरुणाय नमः**' इस मन्त्रसे यथालब्धोपचार पूजन करे तथा निम्न प्रार्थना करे—

ॐ अधिष्ठातः शतर्क्षस्य नमो वरुण चाऽस्तु ते। पूजां मया कृतां भक्त्या गृहीत्वा सफलं कुरु॥

(३) पूर्वाभाद्रपद नक्षत्रके देवता अजैकपाद्—'**ॐ अजैकपदे नमः**' इस मन्त्रसे यथालब्धोपचार पूजन करे तथा निम्न प्रार्थना करे—

ॐ पूर्वाभाद्रपदाधीश नमस्तेऽजैकपात् प्रभो। मृतस्य सद्गतिं कृत्वा मह्यं देहि शुभं फलम्॥

(४) उत्तराभाद्रपद नक्षत्रके देवता अहिर्बुध्न्य—'**ॐ अहिर्बुध्न्याय नमः**' इस मन्त्रसे यथालब्धोपचार पूजन करे तथा निम्न प्रार्थना करे—

ॐ उत्तराभाद्रपदाधीश अहिर्बुध्न्य नमोऽस्तु ते। पूजया वरदो भूत्वा मृतस्य कुरु सद्गतिम्॥

(५) रेवती नक्षत्रके देवता पूषा—'**ॐ पूष्णे नमः**' इस मन्त्रसे यथालब्धोपचार पूजन करे तथा निम्न प्रार्थना करे—

ॐ नमस्ते रेवतीशान पूषन् तव मया कृताम्। पूजां गृहीत्वा वरदो भव कुर्याच्च सद्गतिम्॥

पूजनके बाद समर्पण—**अनया पूजया धनिष्ठादिपञ्चकनक्षत्रदेवताः प्रीयन्ताम्, न मम।**

चौदह यमोंका स्थापन-पूजन—इस प्रकार नक्षत्रदेवताओंके पूजन-नमस्कारके बाद ईशान-कोणमें दक्षिणोत्तरक्रमसे चौदह यमोंका अक्षतपुंजोंपर सुपारी रखकर निम्न रीतिसे आवाहन-पूजन करे—

(१) ॐ भूर्भुवः स्वः यमाय नमः, यमम् आवाहयामि, स्थापयामि।

(२) ॐ भूर्भुवः स्वः धर्मराजाय नमः, धर्मराजम् आवाहयामि, स्थापयामि।

(३) ॐ भूर्भुवः स्वः मृत्यवे नमः, मृत्युम् आवाहयामि, स्थापयामि।

(४) ॐ भूर्भुवः स्वः अन्तकाय नमः, अन्तकम् आवाहयामि, स्थापयामि।

(५) ॐ भूर्भुवः स्वः वैवस्वताय नमः, वैवस्वतम् आवाहयामि, स्थापयामि।

(६) ॐ भूर्भुवः स्वः कालाय नमः, कालम् आवाहयामि, स्थापयामि।

(७) ॐ भूर्भुवः स्वः सर्वभूतक्षयाय नमः, सर्वभूतक्षयम् आवाहयामि, स्थापयामि।

(८) ॐ भूर्भुवः स्वः औदुम्बराय नमः, औदुम्बरम् आवाहयामि, स्थापयामि।

(९) ॐ भूर्भुवः स्वः दध्नाय नमः, दध्नम् आवाहयामि, स्थापयामि।
(१०) ॐ भूर्भुवः स्वः नीलाय नमः, नीलम् आवाहयामि, स्थापयामि।
(११) ॐ भूर्भुवः स्वः परमेष्ठिने नमः, परमेष्ठिनम् आवाहयामि, स्थापयामि।
(१२) ॐ भूर्भुवः स्वः वृकोदराय नमः, वृकोदरम् आवाहयामि, स्थापयामि।
(१३) ॐ भूर्भुवः स्वः चित्राय नमः, चित्रम् आवाहयामि, स्थापयामि।
(१४) ॐ भूर्भुवः स्वः चित्रगुप्ताय नमः, चित्रगुप्तम् आवाहयामि, स्थापयामि।

प्रतिष्ठा—अक्षत लेकर निम्न मन्त्रको पढ़ते हुए चौदहों यमोंपर अक्षत छोड़े।

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वे देवास इह मादयन्तामो३म्प्रतिष्ठ॥

तदनन्तर गन्ध, पुष्प, अक्षत आदिसे नाममन्त्रोंद्वारा पृथक्-पृथक् चौदह यमोंका पूजन करे— **यमादिचित्रगुप्ताश्चतुर्दशयमाः सुप्रतिष्ठिता वरदा भवन्तु।**

पूजनके बाद समर्पण—अनया पूजया चतुर्दशयमाः प्रीयन्ताम्, न मम।

मृत्युंजय-पूजन

यमोंके उत्तरकी ओर पहले स्थापित किये गये कलशपर मृत्युके अधिष्ठाता भगवान् मृत्युंजयका पूजन करे। मृत्युंजयकी स्वर्णकी प्रतिमाका अग्न्युत्तारण तथा प्राणप्रतिष्ठा* कर ले और उस प्राणप्रतिष्ठित रुद्रप्रतिमाको कलशके ऊपर स्थापित कर आवाहन-पूजन करे।

निम्न मन्त्र पढ़कर अक्षत छोड़ते हुए आवाहन करे—

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥

तदनन्तर **ॐ भूर्भुवः स्वः मृत्युञ्जयाय नमः, मृत्युञ्जयम् आवाहयामि, स्थापयामि। मृत्युञ्जय सुप्रतिष्ठितो वरदो भव**—कहकर प्रतिष्ठा करे।

पूजन-प्रार्थना—ॐ भूर्भुवः स्वः मृत्युञ्जयाय नमः—इस मन्त्रसे गन्ध, अक्षत, पुष्प आदिसे पूजनकर निम्न रीतिसे उनकी प्रार्थना करे—

ॐ हस्ताम्भोजयुगस्थकुम्भयुगलादुद्धृत्य तोयं शिरः सिंचन्तं करयोर्युगेन दधतं स्वाङ्के सकुम्भौ करौ।
अक्षस्त्रङ्मृगहस्तमम्बुजगतं मूर्द्धस्थचन्द्रस्त्रवत् पीयूषार्द्रतनुं भजे सगिरिजं त्र्यक्षं च मृत्युञ्जयम्॥

समर्पण—अनया पूजया मृत्युञ्जयः प्रीयताम्, न मम।

पंचसूक्तपाठके लिये ब्राह्मण-वरण

दाहिने हाथमें त्रिकुश, अक्षत, जल तथा वरणसामग्री लेकर निम्न संकल्प करे—

वरणसंकल्प—ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ .....गोत्रः .....शर्मा/वर्मा/गुप्तोऽहमस्मिन् धनिष्ठादिपञ्चकशान्तिकर्मणि सपरिवारस्य मम गृहे दीर्घायुरारोग्यशुभतासिद्ध्यर्थं तत्तन्नक्षत्राधिष्ठातृदेवसूक्तानां (तत्तन्मन्त्राणां वा) जपकर्तृत्वेन विविधगोत्रान् विविधनामधेयान् ब्राह्मणान् युष्मान् एभिर्वरणद्रव्यैर्वृणे।

पंचसूक्त अथवा पंचमन्त्र जापक पाँच ब्राह्मणोंका (अथवा लाघव करना हो तो एक ब्राह्मणके द्वारा भी किया जा सकता है।) गन्धादि उपचारसे पूजन कर वरणसामग्रीद्वारा उनका वरण कर संकल्पजल और वरणसामग्री दे दे।

* अग्न्युत्तारण तथा प्राणप्रतिष्ठा पृ०-सं० १४४ के अनुसार कर ले।

ब्राह्मण बोलें—**वृताः स्मः।**

वरण करके प्रार्थना करे—**यथाविधिसूक्तानि पठध्वं वा तत्तन्मन्त्रान् जपध्वम्।**

वृत ब्राह्मण आचमन-प्राणायाम करके सूक्तोंका पाठ या मन्त्रोंका जप प्रारम्भ कर दें।

पाँच कलशोंके पाँच सूक्त

प्रथम कलशमन्त्र

ॐ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ२ इभेन।
तृष्वीमनु प्रसितिं द्रूणानोऽस्ताऽसि विध्य रक्षसस्तपिष्ठैः॥
तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः।
तपूꣳष्यग्ने जुह्वा पतङ्गानसन्दितो वि सृज विष्वगुल्काः॥
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः।
यो नो दूरे अघशꣳसो यो अन्त्यग्ने मा किष्टे व्यथिरा दधर्षीत्॥
उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ२ ओषतात्तिग्महेते।
यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम्॥
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून्।
अग्नेष्ट्वा तेजसा सादयामि॥

(शु०यजु० १३।९—१३)

अनेन रक्षोघ्नसूक्तपाठाख्येन कर्मणा वसवः प्रीयन्ताम्, न मम।

द्वितीय कलशमन्त्र

ॐ बिभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम्।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति॥
उदु त्यं जातवेदसं देवं वहन्ति केतवः।
दृशे विश्वाय सूर्यम्॥
येना पावक चक्षसा भुरण्यन्तं जनाँ२ अनु।
त्वं वरुण पश्यसि॥
दैव्यावध्वर्यू आ गतꣳ रथेन सूर्यत्वचा।
मध्वा यज्ञꣳ समञ्जाथे॥ तं प्रत्नथा ऽयं वेनश्चित्रं देवानाम्॥
आ न इडाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा॥
यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य।
सर्वं तदिन्द्र ते वशे॥
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।

विश्वमा भासि रोचनम्॥
तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततꣳ सं जभार।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥
तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति॥
बण्महाँ२ असि सूर्य बडादित्य महाँ२ असि।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ२ असि॥
बट् सूर्य श्रवसा महाँ२ असि सत्रा देव महाँ२ असि।
मह्ना देवानामसूर्यः पुरोहितो विभु ज्योतिरदाभ्यम्॥
श्रायन्तऽ इव सूर्यं विश्वेदिन्द्रस्य भक्षत।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम॥
अद्या देवा उदिता सूर्यस्य निरꣳहंसः पिपृता निरवद्यात्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥
आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥

(शु०यजु० ३३।३०—४३)

अनेन सूर्यसूक्तपाठाख्येन कर्मणा वरुणः प्रीयताम्, न मम।

तृतीय कलशमन्त्र

ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्।
संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत् साकमिन्द्रः॥
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा॥
स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्त्रष्टा स युध इन्द्रो गणेन।
सꣳसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता॥
बृहस्पते परि दीया रथेन रक्षोहाऽमित्राँ२ अपबाधमानः।
प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्॥
बलविज्ञाय स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित्॥
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमणन्तमोजसा।
इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायो अनु सꣳ रभध्वम्॥
अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः।
दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु॥
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः।

देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम्॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताᳬं शर्ध उग्रम्।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनाᳬंसि।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ२ उ देवा अवता हवेषु॥
अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम्॥
अवसृष्टा परा पत शरव्ये ब्रह्मसᳬंशिते।
गच्छामित्रान् प्र पद्यस्व माऽमीषां कं चनोच्छिषः॥
प्रेता जयता नर इन्द्रो वः शर्म यच्छतु।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथाऽसथ॥
असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना।
तां गूहत तमसाऽपव्रतेन यथाऽमी अन्यो अन्यं न जानन्॥
यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव।
तन्न इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु॥
मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजाऽमृतेनानुवस्ताम्।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वाऽनु देवा मदन्तु॥

(शु०यजु० १७। ३३—४९)

अनेन अप्रतिरथसूक्तपाठाख्येन कर्मणा अजैकपाद् प्रीयताम्, न मम।

चतुर्थ कलशमन्त्र

ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि॥
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिᳬंसीः पुरुषं जगत्॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिज्जगदयक्ष्मᳬंसुमना असत्॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परा सुव॥
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः।
ये चैनᳬंरुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाᳬंहेड ईमहे॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः।

उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्।
याश्च ते हस्त इषवः परा ता भगवो वप॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२ उत।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।
अथो य इषुधिस्तवारे अस्मन्नि धेहि तम्॥
अवतत्य धनुष्ट्वꣳसहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥
नमस्त आयुधायानातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे॥
(शु०यजु० १६।१—१६)

अनेन रुद्रसूक्तपाठाख्येन कर्मणा अहिर्बुध्न्यः प्रीयताम्, न मम।

पंचम कलशमन्त्र

ॐ ऋचं वाचं प्र पद्ये मनो यजुः प्र पद्ये सामं प्राणं प्र पद्ये चक्षुः श्रोत्रं प्र पद्ये।
वागोजः सहौजो मयि प्राणापानौ॥
यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु।
शं नो भवतु भुवनस्य यस्पतिः॥
भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥
कया नश्चित्र आ भुवदूती सदावृधः सखा।
कया शचिष्ठया वृता॥
कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः।
दृढा चिदारुजे वसु॥
अभी षु णः सखीनामविता जरितृणाम्।

शतं भवास्यूतिभिः ॥
कया त्वं न ऊत्याभि प्र मन्दसे वृषन्।
कया स्तोतृभ्य आ भर ॥
इन्द्रो विश्वस्य राजति।
शं नो अस्तु द्विपदे शं चतुष्पदे ॥
शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥
शं नो वातः पवताꣳ शं नस्तपतु सूर्यः।
शं न कनिक्रदद्देवः पर्जन्यो अभि वर्षतु ॥
अहानि शं भवन्तु नः शꣳ रात्रीः प्रति धीयताम्।
शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या।
शं न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः ॥
शं नो देवीरभिष्टय आपो भवन्तु पीतये।
शं योरभि स्त्रवन्तु नः ॥
स्योना पृथिवि नो भवानृक्षरा निवेशनी।
यच्छा नः शर्म सप्रथाः ॥
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।
महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।
आपो जनयथा च नः ॥
द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ
शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥
दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।
मित्रस्य चक्षुषा समीक्षामहे ॥
दृते दृꣳह मा। ज्योक्ते सन्दृशि जीव्यासं ज्योक्ते सन्दृशि जीव्यासम् ॥
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥
नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥
यतो यतः समीहसे ततो नो अभयं कुरु।

शं न: कुरु प्रजाभ्योऽभयं न: पशुभ्य:॥
सुमित्रिया न आप ओषधय: सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्म:॥
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरद: शतं जीवेम शरद: शतꣳ शृणुयाम शरद: शतं प्र ब्रवाम शरद: शतमदीना:
स्याम शरद: शतं भूयश्च शरद: शतात्॥

(शु०यजु० ३६।१—२४)

अनेन शान्तिसूक्तपाठाख्येन कर्मणा पूषा प्रीयताम्, न मम।

हवन-विधान

हवनकर्मके लिये ब्रह्माका वरण कर ले। पाँच नक्षत्रोंके अधिष्ठाता देवताओंके साथ ही सभी आवाहित देवताओंको आहुति प्रदान करे। हवनसे पूर्व कुशकण्डिका-विधान कर ले।* पूर्वमें वेदीपर अग्नि स्थापित हुई है। अत: कुशास्तरण कर ले। वेदीके पूर्व उत्तराग्र तीन कुश रखे। इसी प्रकार दक्षिण भागमें पूर्वाग्र तीन कुश या दूर्वा रखे। पश्चिम भागमें उत्तराग्र तीन कुश रखे। उत्तर भागमें पूर्वाग्र तीन कुश रखे। यज्ञीय सामग्रियोंको यथास्थान रख ले। वरद नामक अग्निका ध्यान करे और गन्ध-पुष्पादिसे संक्षेपमें पूजन कर ले। तदनन्तर हवन करे—

कर्ता दाहिने घुटनेको भूमिसे लगाकर जलती हुई अग्निमें निम्न रीतिसे आहुति दे। सर्वप्रथम आघाराज्य-होम करे। ये चार आहुतियाँ घीसे दी जायँगी।

आघार होम—(१) ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम। मनमें बोलकर घीकी आहुति दे और स्रुवामें बचे हुए घीकी एक बूँद प्रोक्षणीमें डाले।

(२) ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम। मनमें बोलकर घीकी आहुति दे और स्रुवामें बचे हुए घीकी एक बूँद प्रोक्षणीमें डाले।

आज्यहोम—(३) ॐ अग्नये स्वाहा, इदमग्नये न मम। बोलकर घीकी आहुति दे और स्रुवामें बचे हुए घीकी एक बूँद प्रोक्षणीमें डाले।

(४) ॐ सोमाय स्वाहा, इदं सोमाय न मम। बोलकर घीकी आहुति दे और स्रुवामें बचे हुए घीकी एक बूँद प्रोक्षणीमें डाले।

तदनन्तर घीसे वराहुति प्रदान करे—

वराहुति—

ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥ स्वाहा॥

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन। ससस्त्यश्वक: सुभद्रिकां काम्पीलवासिनीम्॥ स्वाहा॥

* कुशकण्डिका-विधान यहाँ संक्षेपमें दिया है। इसकी पूरी विधि परिशिष्ट (पृ०-सं० ४०५)-में दी गयी है।

यजमान हाथमें जल लेकर द्रव्य-त्यागके लिये बोले—**अस्मिन् होमकर्मणि या या यक्ष्यमाणदेवता ताभ्यस्ताभ्य इमं हवनीयद्रव्यं परित्यक्तं यथादैवतम् अस्तु, न मम।**

नवग्रहादि होम

प्रत्येक देवताओंको नवग्रहोंकी लकड़ी[1]के साथ शाकल्यसे[2] एक-एक या आठ-आठ आहुतियाँ दे।

सूर्य—

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥

अधिदेवताप्रत्यधिदेवतासहिताय सूर्याय स्वाहा।

चन्द्र—

ॐ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳराजा॥

अधिदेवताप्रत्यधिदेवतासहिताय सोमाय स्वाहा।

मंगल—

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाꣳ रेताꣳसि जिन्वति॥

अधिदेवताप्रत्यधिदेवतासहिताय भौमाय स्वाहा।

बुध—

ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳ सृजेथामयं च।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥

अधिदेवताप्रत्यधिदेवतासहिताय बुधाय स्वाहा।

बृहस्पति—

ॐ बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्।
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा॥

अधिदेवताप्रत्यधिदेवतासहिताय बृहस्पतये स्वाहा।

शुक्र—

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥

अधिदेवताप्रत्यधिदेवतासहिताय शुक्राय स्वाहा।

शनि—

ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्त्रवन्तु नः॥

---

१. **अर्कः पलाशखदिरावपामार्गोऽथ पिप्पलः। औदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात्॥** (मत्स्यपु० ९३। २७) मदार, पलाश, खैर, चिचिड़ा, पीपल, गूलर, शमी, दूब और कुश—ये क्रमशः सूर्य, चन्द्र, मंगल, बुध, बृहस्पति, शुक्र, शनि, राहु और केतु ग्रहोंकी समिधाएँ हैं।

२. समित्तिलचर्वाज्यद्रव्यैः सूर्यादिग्रहाणामेकैकाहुतिर्दातव्या। (बृहत्प्रेतमञ्जरी)

अधिदेवताप्रत्यधिदेवतासहिताय शनैश्चराय स्वाहा।

राहु—

ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥

अधिदेवताप्रत्यधिदेवतासहिताय राहवे स्वाहा।

केतु—

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥

अधिदेवताप्रत्यधिदेवतासहिताय केतवे स्वाहा।

पंचलोकपाल, वास्तोष्पति, क्षेत्रपाल तथा दिक्पाल— ॐ गणपत्यादिपञ्चलोकपालेभ्यः स्वाहा। ॐ वास्तोष्पतये स्वाहा। ॐ क्षेत्रपालाय स्वाहा। ॐ इन्द्रादिदशदिक्पालेभ्यः स्वाहा।

नक्षत्रोंके अधिष्ठाता देवों तथा मृत्युंजयके निमित्त हवन— जिस नक्षत्रमें निधन हुआ हो सर्वप्रथम उस नक्षत्रके देवताको १०८ तथा अन्य देवताओंको २८ अथवा आठ-आठ आहुति शाकल्यसे दे[१]—

वसु—

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥ वसवे स्वाहा॥

वरुण—

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि।
वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीद॥ वरुणाय स्वाहा॥

अजैकपाद्—

ॐ उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः।
विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु॥ अजैकपदे स्वाहा॥

अहिर्बुध्न्य—

ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः।
बाहुभ्यामुत ते नमः॥ अहिर्बुध्न्याय स्वाहा॥

पूषा—

ॐ पूषन् तव व्रते वयं न रिष्येम कदा चन।
स्तोतारस्त इह स्मसि॥ पूष्णे स्वाहा॥

मृत्युञ्जय—

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥ मृत्युञ्जयाय स्वाहा॥

चतुर्दश यम-हवन

(१) ॐ यमाय स्वाहा, (२) ॐ धर्मराजाय स्वाहा, (३) ॐ मृत्यवे स्वाहा, (४) ॐ अन्तकाय

१. यस्मिन्नक्षत्रे मरणं जातं तन्नक्षत्रदेवतायाः प्रधानत्वात्प्रथममष्टोत्तरशतं जुहुयात्, अन्येषां चतुर्णां अष्टाविंशतिमष्टौ वा जुहुयात्॥ (बृहत्प्रेतमंजरी)

स्वाहा, (५) ॐ वैवस्वताय स्वाहा, (६) ॐ कालाय स्वाहा, (७) ॐ सर्वभूतक्षयाय स्वाहा, (८) ॐ औदुम्बराय स्वाहा, (९) ॐ दध्नाय स्वाहा, (१०) ॐ नीलाय स्वाहा, (११) ॐ परमेष्ठिने स्वाहा, (१२) ॐ वृकोदराय स्वाहा, (१३) ॐ चित्राय स्वाहा तथा (१४) ॐ चित्रगुप्ताय स्वाहा।

फिर घीसे निम्न मन्त्रद्वारा १६ आहुतियाँ दे—

ॐ यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे॥ स्वाहा॥

इसके बाद निम्न मन्त्रोंसे आहुति दे—

ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्त्रवन्तु नः॥ स्वाहा॥

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ स्वाहा॥

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ स्वाहा॥

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ स्वाहा॥

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ स्वाहा॥

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ स्वाहा॥

ॐ युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि ॥ स्वाहा॥

ॐ युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा॥ स्वाहा॥

ॐ यद्वातो अपो अगनीगन्प्रियामिन्द्रस्य तन्वम्। एतꣳ स्तोतरनेन पथा पुनरश्वमावर्तयासि नः॥ स्वाहा॥

ॐ वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वाञ्जन्तु जागतेन छन्दसा। भूर्भुवःस्वर्लाजी३ञ्छाची३न्यव्ये गव्य एतदन्नमत्त देवा एतदन्नमद्धि प्रजापते॥ स्वाहा॥

ॐ कः स्विदेकाकी चरति क उ स्विज्जायते पुनः। किꣳ स्विद्धिमस्य भेषजं किम्वावपनं महत्॥ स्वाहा॥

ॐ सूर्य एकाकी चरति चन्द्रमा जायते पुनः। अग्निर्हिमस्य भेषजं भूमिरावपनं महत्॥ स्वाहा॥

ॐ का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद् बृहद्वयः। का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला॥ स्वाहा॥

ॐ द्यौरासीत्पूर्वचित्तिरश्व आसीद् बृहद्वयः। अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला॥ स्वाहा॥

आवाहित देवताओंका होम

ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥ स्वाहा॥

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥ स्वाहा॥

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः॥ वरुणाय स्वाहा॥

ॐ आवाहितदेवताभ्यः स्वाहा।

ॐ स्थानदेवताभ्यः स्वाहा।

ॐ कुलदेवताभ्यः स्वाहा।

ॐ सर्वेभ्यो देवेभ्यः स्वाहा।

अग्निपूजन

ॐ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥

स्वाहास्वधायुताय वरदनामाग्नये नमः। इस मन्त्रसे गन्धाक्षतपुष्पादिद्वारा अग्निकी पूजा करे।

स्विष्टकृत् होम

चरु, तिलादि द्रव्य तथा घीको स्रुवामें लेकर खड़ा हो जाय। **अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते, न मम।** कहकर आहुति दे।

हवनसे बचे हुए स्रुवाके घीको प्रोक्षणीपात्रमें छोड़ दे।

नवाहुति

नवाहुति बैठकर प्रदान करे—

ॐ भूः स्वाहा, इदमग्नये न मम।

ॐ भुवः स्वाहा, इदं वायवे न मम।

ॐ स्वः स्वाहा, इदं सूर्याय न मम।

ॐ त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत्॥ स्वाहा॥ इदमग्नीवरुणाभ्यां न मम।

ॐ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुणꣳ रराणो व्रीहि मृडीकꣳ सुहवो न एधि॥ स्वाहा॥ इदमग्नीवरुणाभ्यां न मम।

ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि। अया नो यज्ञं व्वहास्यया नो धेहि भेषजꣳ॥ स्वाहा॥ इदमग्नयेऽयसे न मम।

ॐ येते शतं वरुण ये सहस्रं यज्ञियाः पाशाविततामहान्तः। तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः॥ स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च, न मम।

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय। अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम॥ स्वाहा॥ इदं वरुणायादित्यायादितये न मम।

(मौन होकर) **ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये न मम।**

बलिदान

आवाहितदेवेभ्यो नमः, गन्धाक्षतपुष्पाणि समर्पयामि।

आवाहितदेवेभ्यो नमः, दधिमाषभक्तबलिं समर्पयामि।

अनेन बलिदानेन सर्वे देवाः प्रीयन्ताम्, न मम।

पूर्णाहुति

यजमान हाथ-पैर धोकर आचमन कर ले, फिर गरीके गोलेका ऊपरी हिस्सा कुछ काटकर उसमें घी भर दे। उसे लाल कपड़ेसे लपेटकर घृतपूर्ण गरीके गोलेको स्रुवाके ऊपर रख दे। फिर '**ॐ पूर्णाहुत्यै नमः**' कहकर पंचोपचार पूजन कर ले। तदनन्तर दाहिने हाथमें स्रुवाको लेकर खड़ा हो जाय और इस मन्त्रको पढ़ते हुए पूर्णाहुति प्रदान करे—

ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत।
वस्नेव विक्रीणावहा इषमूर्जꣳ शतक्रतो॥ स्वाहा॥

इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽअग्नये अद्‌भ्यश्च न मम।

हुतावशेष एक बूँद घी प्रोक्षणीपात्रमें डाल दे।

वसोर्धारा

आज्यस्थालीमें बचे हुए घीको लेकर निम्न मन्त्र पढ़ते हुए स्रुवासे अग्निमें धारा गिराये—

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्॥
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥ स्वाहा॥

इदमग्नये वैश्वानराय, न मम।

त्र्यायुष्—इसके बाद अग्निकी प्रदक्षिणा करके अग्निके पश्चिम तरफ पूर्वाभिमुख बैठ जाय। फिर ईशान-कोणसे स्रुवासे भस्म लेकर आचार्य दाहिने हाथकी अनामिकासे दाहिने हाथकी अनामिकासे स्वयं तथा यजमानको निम्न मन्त्रोंसे लगाये—

ॐ त्र्यायुषं जमदग्नेः—कहकर ललाटमें लगाये।

ॐ कश्यपस्य त्र्यायुषम्—कहकर ग्रीवा (कण्ठ)-में लगाये।

ॐ यद्देवेषु त्र्यायुषम्—कहकर दक्षिण बाहुमूलमें लगाये।

ॐ तन्नोऽस्तु त्र्यायुषम्—कहकर हृदयमें लगाये।

संस्रवप्राशन—प्रोक्षणीपात्रवाले घीको लेकर किसी अन्य पात्रमें रखकर पी ले अथवा सूँघ ले, फिर आचमन करे। पवित्रीद्वारा प्रणीताके जलसे अपने ऊपर मार्जन करे। पवित्रीको अग्निमें छोड़ दे।

पूर्णपात्रदान—पहलेसे चावल भरकर रखे गये पूर्णपात्रको कुश, वृषनिष्क्रय-दक्षिणा, जल एवं अक्षत लेकर ब्रह्माके लिये पूर्णपात्रदानका संकल्प करे—

ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ .....गोत्रः .....शर्मा/वर्मा/गुप्तोऽहं पञ्चकशान्त्यङ्गभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं वृषनिष्क्रयभूतद्रव्यसहितं सदक्षिणं पूर्णपात्रं प्रजापतिदैवतं .....गोत्राय .....शर्मणे ब्राह्मणाय ब्रह्मणे भवते सम्प्रददे।

'**ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु**' बोलकर ब्रह्मा यजमानसे पूर्णपात्र ले ले।

इसके बाद अग्निके पश्चिम भागमें प्रणीताका जल गिराकर निम्न मन्त्र पढ़ते हुए उपयमन कुशोंके द्वारा उस जलसे अपने तथा यजमानके मस्तकपर मार्जन करे और उन कुशाओंको अग्निमें छोड़ दे। ब्रह्मग्रन्थि खोल दे।

ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्।

बर्हिहोम—इसके बाद जिस क्रमसे वेदीके चारों ओर कुश बिछाये हैं, उसी क्रमसे उन्हें उठाकर घीसे प्रोक्षण कर निम्न मन्त्र पढ़ते हुए उनको अग्निमें छोड़ दे—

ॐ देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः॥ स्वाहा॥

तर्पण—नक्षत्रके अधिष्ठाता देवताओंको जितनी आहुतियाँ प्रदान की गयी हों, उनका दशांश तर्पण तथा तर्पणका दशांश मार्जन करे।

अभिषेक

वरुणकलशके जलसे आचार्य निम्न मन्त्रोंद्वारा यजमानका अभिषेक करे—

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥
ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥
ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥
ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः॥ १॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा॥ २॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा॥ ३॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥ ४॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः॥ ५॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः॥ ६॥
ऋषयो मुनयो गावो देवमातर एव च।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसाङ्गणाः॥ ७॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च।
औषधानि च रत्नानि कालस्यावयवाश्च ये॥ ८॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये॥ ९॥

आमान्न-दान

अन्नदानका संकल्प—हाथमें त्रिकुश, अक्षत, जल लेकर यजमान बोले—**ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ .....गोत्रः .....शर्मा/वर्मा/गुप्तोऽहं पञ्चकशान्त्यङ्गत्वेन ब्राह्मणभोजनपर्याप्तमामान्नं सदक्षिणं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुम् उत्सृज्ये (सम्प्रददे वा)।** संकल्पका जल छोड़ दे।

दक्षिणादानका संकल्प—हाथमें त्रिकुश, अक्षत, जल लेकर यजमान जपकर्ता ब्राह्मणोंके लिये दक्षिणादानका संकल्प करे—**ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ .....गोत्रः .....शर्मा/वर्मा/गुप्तोऽहं कृतस्य पञ्चकनिधनशान्तिकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च मनसोद्दिष्टं दक्षिणाद्रव्यं विविधगोत्रेभ्यो विविधनामधेयेभ्यो वसुवरुणाजैकपादहिर्बुध्न्यपूषादेवतामन्त्र (सूक्त)-जापकेभ्यो ब्राह्मणेभ्यो विभज्य सम्प्रददे (दातुमुत्सृज्ये वा)।** कहकर ब्राह्मणोंको दक्षिणा प्रदान करे।

इसके बाद आचार्यके लिये त्रिकुश, अक्षत, जल तथा गोनिष्क्रयद्रव्य लेकर गोदानका निम्न संकल्प करे—

गोदानका संकल्प—ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ......गोत्रः ......शर्मा/वर्मा/गुप्तोऽहं कृतस्य पञ्चकनिधनशान्तिकर्मणः साङ्गताप्रतिष्ठासिद्ध्यर्थं न्यूनातिरिक्तदोषपरिहारार्थं च इदं गोनिष्क्रयद्रव्यं ......गोत्राय ......शर्मणे आचार्याय भवते सम्प्रददे (दातुमुत्सृज्ये वा)। कहकर द्रव्य आचार्यको दे दे।

आचार्य बोले—'ॐ स्वस्ति'।

कर्ता हाथ जोड़कर गौकी इस प्रकार प्रार्थना करे—

गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्॥
या लक्ष्मीः सर्वभूतानां या च देवे प्रतिष्ठिता।
धेनुरूपेण सा देवी मम पापं व्यपोहतु॥

छायापात्र-दान

आज्यावलोकन—पिघले हुए घीको कांस्यके कटोरेमें रखकर उसमें सुवर्ण आदि दक्षिणा डाल दे। यजमान त्रिकुश, अक्षत, जल लेकर निम्न संकल्प करे—

प्रतिज्ञा-संकल्प—ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ......गोत्रः ......शर्मा/वर्मा/गुप्तोऽहं कृतस्य पञ्चकनिधनशान्तिकर्मणः साङ्गतासिद्ध्यर्थं मम सपरिवारस्य सर्वारिष्टविनाशार्थं च आज्यावेक्षणं करिष्ये। —बोलकर जलादि छोड़ दे और निम्न मन्त्रसे घीमें अपना मुख देखे—

ॐ रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा वि भजतु।
ऋतस्य पथा प्रेत चन्द्रदक्षिणा वि स्वः पश्य व्यन्तरिक्षं यतस्व सदस्यैः॥

मुख देखकर त्रिकुश, अक्षत, जल लेकर निम्न संकल्प करे—

ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ......गोत्रः ......शर्मा/वर्मा/गुप्तोऽहं स्वमुखावलोकितम् इदं कांस्यपात्रस्थितम् आज्यं सदक्षिणं मृत्युञ्जयदेवताप्रीत्यर्थं सर्वारिष्टविनाशार्थं च ......गोत्राय ......शर्मणे ब्राह्मणाय भवते सम्प्रददे। —बोलकर ब्राह्मणको आज्यपात्र दे दे।

ब्राह्मण बोले—**'ॐ स्वस्ति'।**

तदनन्तर यजमान प्रार्थना करे—

ॐ याऽलक्ष्मीर्यच्च मे दौस्थ्यं सर्वाङ्गं समुपस्थितम्।
तत्सर्वं नाशयाऽऽज्य त्वं श्रियमायुश्च वर्द्धय॥
आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितम्।
आज्यपात्रप्रदानेन शान्तिरस्तु सदा मम॥

भूयसी दक्षिणा-संकल्प—हाथमें त्रिकुश, अक्षत, जल तथा दक्षिणा लेकर निम्न संकल्प करे—

ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ......गोत्रः ......शर्मा/वर्मा/गुप्तोऽहं कृतस्य पञ्चकनिधनशान्तिकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं तत्र न्यूनाधिक्यदोषपरिहारार्थं च विविधगोत्रेभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च विभज्य भूयसीं दक्षिणां दातुमुत्सृज्ये। बोलकर दक्षिणा बाँट दे।

उत्तरपूजन—ॐ आवाहितगणपत्यादिसमस्तदेवताभ्यो नमः, उत्तरपूजनार्थे गन्धाक्षतपुष्पधूपदीप-नैवेद्यादीनि वस्तूनि समर्पयामि बोलकर आवाहित देवताओंकी संक्षिप्त पूजा कर ले।

आरती—कर्पूर या घृतकी बत्ती किसी पात्रमें जलाकर निम्न मन्त्रसे आरती करे—

ॐ इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त॥
कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि॥

कर्पूरनीराजनं समर्पयामि—बोलकर आचमनीसे जल छोड़ दे।

आवाहित देवताओंका विसर्जन—निम्न मन्त्रोंको पढ़कर विसर्जन करे—

ॐ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा।
एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर।
यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन॥

भगवान्‌का स्मरण एवं प्रार्थना—हाथ जोड़कर भगवान्‌का स्मरण करते हुए कहे—

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
यत्पादपङ्कजस्मरणाद् यस्य नामजपादपि। न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम्॥

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।
ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः। ॐ साम्बसदाशिवाय नमः।

॥ पंचकशान्ति-प्रयोगविधि पूर्ण हुई॥

नारायणबलिमें पाठ किये जानेवाले पाँच सूक्त

नारायणबलिमें ब्रह्मा, विष्णु, रुद्र, यम तथा प्रेत—इन पाँच सूक्तोंके पाठ करनेकी विधि है। पाठ करनेकी दृष्टिसे इन्हें यहाँ मूलरूपमें प्रस्तुत किया जा रहा है—

(१) ब्रह्मसूक्त

ॐ तेजोऽसि शुक्रममृतमायुष्पा आयुर्मे पाहि।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददे॥ १॥

इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या।
सा नो अस्मिन्त्सुत आ बभूव ऋतस्य सामन्त्सरमारपन्ती॥ २॥

अभिधा असि भुवनमसि यन्ताऽसि धर्ता।
स त्वमग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः॥ ३॥

स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं मन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम्।
तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि॥ ४॥

प्रजापतये त्वा जुष्टं प्रोक्षामीन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षामि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि। यो अर्वन्तं जिघाꣳसति तमभ्यमीति वरुणः। परो मर्तः परः श्वा॥ ५॥

अग्नये स्वाहा सोमाय स्वाहा ऽपां मोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा॥ ६॥

हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहा ऽवक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहा ऽऽसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा सꣳहानाय स्वाहोपस्थिताय स्वाहा ऽऽयनाय स्वाहा प्रायणाय स्वाहा॥ ७॥

यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा जवाय स्वाहा बलाय स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा यन्मूत्रं करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा॥ ८॥

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ ९॥
हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम्॥ १०॥
देवस्य चेततो महीं प्र सवितुर्हवामहे। सुमतिꣳ सत्यराधसम्॥ ११॥
सुष्टुतिꣳ सुमतीवृधो रातिꣳ सवितुरीमहे। प्र देवाय मतीविदे॥ १२॥
रातिꣳ सत्पतिं महे सवितारमुप ह्वये। आसवं देववीतये॥ १३॥
देवस्य सवितुर्मतिमासवं विश्वदेव्यम्। धिया भगं मनामहे॥ १४॥

अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम्। हव्या देवेषु नो दधत्॥ १५॥
स हव्यवाडमर्त्य उशिग्दूतश्चनोहितः। अग्निर्धिया समृण्वति॥ १६॥
अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ२ आ सादयादिह॥ १७॥
अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः। गोजीरया रꣳहमाणः पुरन्ध्या॥ १८॥

विभूर्मात्रा प्रभूः पित्राऽश्वोऽसि हयोऽस्यत्योऽसि मयोऽस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि। ययुर्नामाऽसि शिशुर्नामाऽस्यादित्यानां पत्वाऽन्विहि देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितꣳ रक्षतेह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहा॥ १९॥

काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा स्वाहाऽऽधिमाधीताय स्वाहा मनः प्रजापतये स्वाहा चित्तं विज्ञातायादित्यै स्वाहा ऽदित्यै मह्यै स्वाहा ऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिपाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहा॥ २०॥

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम्। विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा॥ २१॥

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥ २२॥

प्राणाय स्वाहा ऽपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा॥ २३॥

प्राच्यै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा॥ २४॥

अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहा ऽर्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा॥ २५॥

वाताय स्वाहा धूमाय स्वाहा ऽभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहा ऽवस्फूर्जते स्वाहा वर्षते स्वाहा ऽववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा॥ २६॥

अग्नये स्वाहा सोमाय स्वाहेन्द्राय स्वाहा पृथिव्यै स्वाहा ऽन्तरिक्षाय स्वाहा दिवे स्वाहा दिग्भ्यः स्वाहा ऽऽशाभ्यः स्वाहोर्व्यै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा॥ २७॥

नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहा ऽहोरात्रेभ्यः स्वाहा ऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहा ऋतुभ्यः स्वाहा ऽऽर्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहा ऽऽदित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा॥ २८॥

पृथिव्यै स्वाहा ऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहा ऽद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा परिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा॥ २९॥

असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहा ऽभिभुवे

स्वाहा ऽधिपतये स्वाहा शूषाय स्वाहा सꣳसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा॥ ३०॥

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहा ऽꣳहसस्पतये स्वाहा॥ ३१॥

वाजाय स्वाहा प्रसवाय स्वाहा ऽपिजाय स्वाहा क्रतवे स्वाहा स्वः स्वाहा मूर्ध्ने स्वाहा व्यश्नुविने स्वाहा ऽन्त्याय स्वाहा ऽन्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहा ऽधिपतये स्वाहा प्रजापतये स्वाहा॥ ३२॥

आयुर्यज्ञेन कल्पताꣳ स्वाहा प्राणो यज्ञेन कल्पताꣳ स्वाहा ऽपानो यज्ञेन कल्पताꣳ स्वाहा व्यानो यज्ञेन कल्पताꣳ स्वाहोदानो यज्ञेन कल्पताꣳ स्वाहा समानो यज्ञेन कल्पताꣳ स्वाहा चक्षुर्यज्ञेन कल्पताꣳ स्वाहा श्रोत्रं यज्ञेन कल्पताꣳ स्वाहा वाग्यज्ञेन कल्पताꣳ स्वाहा मनो यज्ञेन कल्पताꣳ स्वाहा ऽऽत्मा यज्ञेन कल्पताꣳ स्वाहा ब्रह्मा श्रोत्रं यज्ञेन कल्पताꣳ स्वाहा ज्योतिर्यज्ञेन कल्पताꣳ स्वाहा स्वर्यज्ञेन कल्पताꣳ स्वाहा पृष्ठं यज्ञेन कल्पताꣳ स्वाहा यज्ञो यज्ञेन कल्पताꣳ स्वाहा॥ ३३॥

एकस्मै स्वाहा द्वाभ्याꣳ स्वाहा शताय स्वाहैकशताय स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहा॥ ३४॥

(शु०यजु० अध्याय २२)

(२) विष्णुसूक्त

ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्।
स भूमिꣳ सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम्॥ १॥
पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति॥ २॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥ ३॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि॥ ४॥
ततो विराडजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ ५॥
तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये॥ ६॥
तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥ ७॥
तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥ ८॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये॥ ९॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते॥ १०॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत॥ ११॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥ १२॥
नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन्॥ १३॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥ १४॥
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम्॥ १५॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ १६॥
अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे॥ १७॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥ १८॥
प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते।
तस्य योनिं परि पश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा॥ १९॥
यो देवेभ्य आतपति यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये॥ २०॥
रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन्।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन् वशे॥ २१॥
श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण॥ २२॥

(शु०यजु० अध्याय ३१)

(३) रुद्रसूक्त

ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः।
बाहुभ्यामुत ते नमः॥ १॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि॥ २॥
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत्॥ ३॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत्॥ ४॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहीँश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परा सुव॥ ५॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः।
ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे॥ ६॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः॥ ७॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः॥ ८॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्।
याश्च ते हस्त इषवः परा ता भगवो वप॥ ९॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२ उत।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः॥ १०॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज॥ ११॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।
अथो य इषुधिस्तवारे अस्मन्नि धेहि तम्॥ १२॥
अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥ १३॥
नमस्त आयुधायानातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥ १४॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः॥ १५॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे॥ १६॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः॥ १७॥

नमो बभ्लुशाय व्याधिने ऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमः॥ १८॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः॥ १९॥

नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमः॥ २०॥

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः॥ २१॥

नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो ऽस्यद्भ्यश्च वो नमः॥ २२॥

नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्य आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः॥ २३॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्यो ऽश्वपतिभ्यश्च वो नमो नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः॥ २४॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः॥ २५॥

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो अरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो अर्भकेभ्यश्च वो नमः॥ २६॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः॥ २७॥

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च॥ २८॥

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च॥ २९॥

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च॥ ३०॥

नम आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च॥ ३१॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च॥ ३२॥

नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च॥ ३३॥

नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च॥ ३४॥

नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च॥ ३५॥

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च॥ ३६॥

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च॥ ३७॥

नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च॥ ३८॥

नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च॥ ३९॥

नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय॥ ४०॥

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥ ४१॥

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च॥ ४२॥

नमः सिकत्याय च प्रवाह्याय च नमः किᳬशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नम इरिण्याय च प्रपथ्याय च॥ ४३॥

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च॥ ४४॥

नमः शुष्क्याय च हरित्याय च नमः पाᳬसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्व्याय च॥ ४५॥

नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाᳬ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः॥ ४६॥

द्रापे अन्धसस्पते दरिद्र नीललोहित।
आसां प्रजानामेषां पशूनां मा भेर्मा रोङ्मो च नः किंचनाममत्॥ ४७॥

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥ ४८॥

या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी।
शिवा रुतस्य भेषजी तया नो मृड जीवसे॥ ४९॥

परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड॥ ५०॥

मीढुष्टम शिवतम शिवो नः सुमना भव।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं बिभ्रदा गहि॥ ५१॥

विकिरिद्र विलोहित नमस्ते अस्तु भगवः।
यास्ते सहस्रᳬ हेतयोऽन्यमस्मन्नि वपन्तु ताः॥ ५२॥

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः।
तासामीशानो भगवः पराचीना मुखा कृधि॥ ५३॥

असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम्।
तेषाᳬ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ५४॥

अस्मिन् महत्यर्णवे ऽन्तरिक्षे भवा अधि।
तेषाᳬ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ५५॥

नीलग्रीवाः शितिकण्ठा दिवᳬ रुद्रा उपश्रिताः।
तेषाᳬ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ५६॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ५७॥
ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ५८॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ५९॥
ये पथां पथिरक्षय ऐलबृदा आयुर्युधः।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ६०॥
ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ६१॥
येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ६२॥
य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥ ६३॥
नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।
तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते
यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः॥ ६४॥
नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।
तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते
यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः॥ ६५॥
नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।
तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते
यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः॥ ६६॥

(शु०यजु० अध्याय १६)

(४) यमसूक्त

ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः॥ १ ॥
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परि जग्रभत्॥ २ ॥

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः।
हिरण्यगर्भ इत्येष मा मा हिꣳसीदित्येषा यस्मान्न जात इत्येषः[1]॥ ३ ॥
एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः।
स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः॥ ४ ॥
यस्माज्जातं न पुरा किं चनैव य आबभूव भुवनानि विश्वा।
प्रजापतिः प्रजया सꣳरराणस्त्रीणि ज्योतीꣳषि सचते स षोडशी॥ ५ ॥
येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥ ६ ॥
यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम।
आपो ह यद्बृहतीर्यश्चिदापः[2]॥ ७ ॥
वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्।
तस्मिन्निदꣳ सं च वि चैति सर्वꣳ स ओतः प्रोतश्च विभूः प्रजासु॥ ८ ॥
प्र तद्वोचेदमृतं नु विद्वान् गन्धर्वो धाम विभृतं गुहा सत्।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पिताऽसत्॥ ९ ॥

---

१. इसके बाद निम्न मन्त्रोंका भी पाठ करना चाहिये—

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥
यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।
यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम॥
(यजु० २५। १०-१३)

मा मा हिꣳ सीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा व्यानट्।
यश्चापश्चन्द्राः प्रथमो जनान कस्मै देवाय हविषा विधेम॥
(यजु० १२। १०२)

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा।
प्रजापतिः प्रजया सꣳ रराणस्त्रीणि ज्योतीꣳषि सचते स षोडशी॥
इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम्।
तयोरहमनु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा॥
(यजु० ८। ३६-३७)

२. इसके अनन्तर निम्न दो मन्त्रोंका भी पाठ करना चाहिये —

आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानाꣳ समवर्ततासुरेकः कस्मै देवाय हविषा विधेम॥
यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम्।
यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम॥
(यजु० २७। २५-२६)

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त॥ १०॥
परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च।
उपस्थाय प्रथमजामृतस्यात्मनाऽऽत्मानमभि सं विवेश॥ ११॥
परि द्यावापृथिवी सद्य इत्वा परि लोकान् परि दिशः परि स्वः।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत्॥ १२॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्।
सनि मेधामयासिषꣳ स्वाहा॥ १३॥
यां मेधां देवगणाः पितरश्चोपासते।
तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा॥ १४॥
मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा॥ १५॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा॥ १६॥

(शु०यजु० अध्याय ३२)

(५) प्रेतसूक्त

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः। अस्य लोकः सुतावतः।
द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै॥ १ ॥
सविता ते शरीरेभ्यः पृथिव्याँल्लोकमिच्छतु।
तस्मै युज्यन्तामुस्त्रियाः॥ २ ॥
वायुः पुनातु सविता पुनात्वग्नेर्भ्राजसा सूर्यस्य वर्चसा। वि मुच्यन्तामुस्त्रियाः॥ ३ ॥
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।
गोभाज इत्किलासथ यत्सनवथ पूरुषम्॥ ४ ॥
सविता ते शरीराणि मातुरुपस्थ आ वपतु।
तस्मै पृथिवि शं भव॥ ५ ॥
प्रजापतौ त्वा देवतायामुपोदके लोके नि दधाम्यसौ।
अप नः शोशुचदघम्॥ ६ ॥
परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान्॥ ७ ॥
शं वातः शꣳ हि ते घृणिः शं ते भवन्त्विष्टकाः।
शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाऽभि शूशुचन्॥ ८ ॥
कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः।
अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः॥ ९ ॥

अश्मन्वती रीयते सꣳ रभध्वमुत्तिष्ठत प्र तरता सखायः।
अत्रा जहीमोऽशिवा ये असञ्छिवान्वयमुत्तरेमाभि वाजान्॥ १०॥
अपाघमप किल्बिषमप कृत्यामपो रपः।
अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव॥ ११॥
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥ १२॥
अनड्वाहमन्वारभामहे सौरभेयꣳ स्वस्तये।
स न इन्द्र इव देवेभ्यो वह्निः सन्तारणो भव॥ १३॥
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥ १४॥
इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम्।
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन॥ १५॥
अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः।
आरे बाधस्व दुच्छुनाम्॥ १६॥
आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमान्त्स्वाहा॥ १७॥
परीमे गामनेषत पर्यग्निमहृषत।
देवेष्वक्रत श्रवः क इमाँ२ आ दधर्षति॥ १८॥
क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः।
इहैवायामितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्॥ १९॥
वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान् पराके।
मेदसः कुल्या उप तान्त्स्रवन्तु सत्या एषामाशिषः सं नमन्ताꣳ स्वाहा॥ २०॥
स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः।
अप नः शोशुचदघम्॥ २१॥
अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः।
असौ स्वर्गाय लोकाय स्वाहा॥ २२॥

(शु०यजु० अध्याय ३५)

वैतरणी-गोदानकी सामग्री

(१) गंगाजल अथवा शुद्ध जल
(२) विष्णु-प्रतिमा (सोनेकी)—१ नग
(३) पीताम्बर] (भगवान् विष्णुके लिये)
(४) उत्तरीय वस्त्र]
(५) सोनेकी यम-प्रतिमा—१ (भैंसावाहनसहित)
(६) लौहदण्ड—१
(७) कालावस्त्र तथा उपवस्त्र—२ (यमके लिये)
(८) रूई—२ किलो (पहाड़ बनानेके लिये)
(९) कलश लपेटनेके लिये वस्त्र
(१०) सवत्सा प्रत्यक्ष गौ
(११) सोनेके सींग—२ (एक जोड़ा)
(१२) चाँदीके खुर—४
(१३) ताँबेका पत्र (गायकी पीठपर डालनेके लिये १२ अंगुल लम्बा तथा ४ अंगुल चौड़ा)—१
(१४) मोतीकी लड़ी (गायकी पूँछमें बाँधनेके लिये)
(१५) माला, घंटी, पायल, घुँघरू, काला वस्त्र तथा उपवस्त्र (गाय तथा बछियाको अलंकृत करनेके लिये)
(१६) चँवर—१ नग
(१७) लोहेकी नाँद—१ नग
(१८) बाल्टी—१ (दूध दुहनेके लिये)
(१९) काँसेका कटोरा—१ नग
(२०) ताँबेका कलश ढक्कनसहित—१ नग तथा कलश स्थापित करनेके लिये कलशाधारपात्र (ताँबेकी तश्तरी)
(२१) ताँबेका बड़ा तष्टा—१ नग
(२२) भूसा—२ किलो] (गायको
(२३) चनेकी भूसी—१ किलो] खिलानेके लिये)
(२४) गुड़—२ किलो]

पूजन-सामग्री—

(१) चन्दन —१ कटोरी घिसा हुआ
(२) रोली—२५ ग्राम
(३) अक्षत (चावल)—१ किलो
(४) अबीर-बुक्का—२५ ग्राम
(५) सिन्दूर—१० ग्राम
(६) मौली—१ गोला
(७) सुपारी—१५ नग
(८) पान—१५ नग
(९) रूई—१० ग्राम
(१०) गोघृत—२०० ग्राम (रक्षादीपके लिये)
(११) धूप—२ पैकेट
(१२) कपूर—१० ग्राम
(१३) दियासलाई—१ नग
(१४) लौंग, इलायची—१०-१० ग्राम
(१५) जनेऊ—८ नग
(१६) हल्दी-चूर्ण—१० ग्राम
(१७) गायका दूध—५० ग्राम
(१८) गायका दही—५० ग्राम
(१९) मधु—५० ग्राम
(२०) चीनी देशी—१०० ग्राम
(२१) काला तिल—१०० ग्राम
(२२) जौ—५० ग्राम
(२३) इत्र—१ शीशी (छोटी)
(२४) नैवेद्य (पेड़ा-मिसरी आदि)—१० नग
(२५) ऋतुफल-१० नग
(२६) फूलकी माला—१० नग
(२७) पुष्प, तुलसीपत्र, बिल्वपत्र
(२८) दूर्वा
(२९) मिट्टीका दीया—१५ नग
(३०) मिट्टीका सकोरा—१० नग
(३१) कुशा—२५ नग
(३२) गोमय-गोमूत्र
(३३) गन्ना (ईख) पतला जो मुड़ सके—४ तथा मूँजकी रस्सी (नाव बनानेके लिये)
(३४) सर्वौषधि—५ ग्राम (कलशके लिये)
(३५) सप्तधान्य—५० ग्राम
(३६) पूजन-सामग्री रखनेके लिये २ थाली, लोटा, बाल्टी आदि जलके लिये (घरसे)

ब्राह्मणवरण-सामग्री—

(१) धोती—१ नग
(२) गमछा—१ नग
(३) लोटा—१ नग
(४) आचमनी—१ नग
(५) पंचपात्र—१ नग
(६) माला—१ नग
(७) आसन—१ नग
(८) द्रव्यदक्षिणा

वैतरणी-गोदानकी विधि

वैतरणी-गोदानके पूर्व स्वस्तिवाचन तथा गणपति एवं गौरीका पूजन कर लेना चाहिये। कोई प्रतिमा-विग्रह इत्यादि न रहनेपर सुपारीपर मौली लपेटकर गणेशजी बना ले तथा किसी धातुपात्र अथवा मिट्टीके पात्रमें रख ले। उनके दाहिनी ओर सुपारीके बराबर गोबरसे गौरी बनाकर रख ले। तदनन्तर गोदान करानेवाले पण्डित स्वस्तिवाचन करें तथा कर्ताको चाहिये कि वह हाथमें अक्षत और पुष्प ले ले—

स्वस्त्ययन

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ यतो यतः समीहसे ततो नो अभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः॥ सुशान्तिर्भवतु॥

श्रीमन्महागणाधिपतये नमः। लक्ष्मीनारायणाभ्यां नमः। उमामहेश्वराभ्यां नमः। वाणीहिरण्यगर्भाभ्यां नमः। शचीपुरन्दराभ्यां नमः। मातापितृचरणकमलेभ्यो नमः। इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः। स्थानदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः। ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे संकटे चैव विघ्नस्तस्य न जायते॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥
वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥
गणेशाम्बिकाभ्यां नमः॥

हाथमें लिये अक्षत-पुष्पको गणेशजी एवं अम्बिकापर चढ़ा दे। इसके बाद दाहिने हाथमें जल, अक्षत और पुष्प लेकर प्रतिज्ञा-संकल्प करे—

प्रतिज्ञा-संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः नमः परमात्मने पुरुषोत्तमाय ॐ तत्सत् अद्यैतस्य विष्णोराज्ञया जगत्सृष्टिकर्मणि प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे तत्प्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे ......क्षेत्रे (यदि काशीमें हो तो **अविमुक्तवाराणसीक्षेत्रे गौरीमुखे त्रिकण्टकविराजिते महाश्मशाने भगवत्या उत्तरवाहिन्या भागीरथ्या वामभागे) बौद्धावतारे ......नाम संवत्सरे उत्तरायणे/दक्षिणायने ......ऋतौ ......मासे ......पक्षे ......तिथौ ......वासरे एवं ग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ......गोत्रः ......शर्मा/वर्मा/गुप्तोऽहं मम** (यदि प्रतिनिधि करे तो **'अहं मम'**के स्थानपर **......गोत्रस्य शर्मणः/वर्मणः/गुप्तस्य प्रतिनिधिभूतोऽहं तदीय**-कहे) **अनेकजन्मोपार्जित-ज्ञाताज्ञातकायिकवाचिकमानसिकसांसर्गिकसमस्तपापनिवृत्तिपूर्वकयमद्वारस्थितभयङ्करवैतरणीनदीतरणकामनया**

सवत्सायाः सुपूजिताया यथाशक्त्यलङ्कृताया रुद्रदैवत्या वैतरणीगव्या दानं करिष्ये (करिष्यामि)। (यदि गौ उपस्थित न हो तो) **मनसोद्दिष्टाय ब्राह्मणाय यथाशक्तिवैतरणीगवीनिष्क्रयभूतं द्रव्यदानं करिष्ये (करिष्यामि)। तदङ्गत्वेनादौ गणेशाम्बिकयोः पूजनं पुण्याहवाचनं षोडशोपचारैः श्रीलक्ष्मीनारायणस्य पूजनं तूलपर्वते प्रतिष्ठापिते कलशे सायुधस्य सवाहनस्य सपरिवारस्य यमराजस्य पूजनं सवत्साया वैतरणी-गव्यास्तदङ्गदेवानां वृतब्राह्मणस्य च पूजनं गोपुच्छोदकतर्पणं च करिष्ये (करिष्यामि)।** संकल्पजल छोड़ दे।

गणपति और गौरीकी पूजा[१]

(पूजामें जो वस्तु विद्यमान न हो उसके लिये '**मनसा परिकल्प्य समर्पयामि**' कहे। जैसे, आभूषणके लिये '**आभूषणं मनसा परिकल्प्य समर्पयामि।**'

भगवान् गणेशका आवाहन—हाथमें अक्षत लेकर भगवान् गणेशका आवाहन करे—

ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे। निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥

सिद्धिबुद्धिसहिताय गणपतये नमः, गणपतिमावाहयामि, स्थापयामि, पूजयामि च।

हाथके अक्षत गणेशजीपर चढ़ा दे।

भगवती गौरीका आवाहन—अक्षत लेकर गणेशजीके दाहिनी ओर गौरीका आवाहन करे—

ॐ अम्बेऽम्बिकेऽम्बालिके न मा नयति कश्चन।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥

गौर्यै नमः, गौरीमावाहयामि, स्थापयामि, पूजयामि च।

प्रतिष्ठा—

मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वे देवास इह मादयन्तामो३म्प्रतिष्ठ॥

गणेशाम्बिके सुप्रतिष्ठिते वरदे भवेताम्। श्रीगणेशाम्बिकाभ्यां नमः, प्रतिष्ठापूर्वकमासनार्थे अक्षतान् समर्पयामि।

आसनके लिये अक्षत समर्पित करे।

पाद्य, अर्घ, आचमनीय, स्नानीय, पुनराचमनीय—

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।

श्रीगणेशाम्बिकाभ्यां नमः, एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि समर्पयामि। (इतना कहकर चार आचमनीय जल चढ़ा दे।)

पंचामृतस्नान—

ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥

श्रीगणेशाम्बिकाभ्यां नमः, पञ्चामृतस्नानं समर्पयामि। (पंचामृतसे स्नान कराये।)

१. यहाँ प्रायः वैदिक तथा पौराणिक दोनों मन्त्र दिये गये हैं, समयाभाव हो तो केवल नाममन्त्र—'**श्रीगणेशाम्बिकाभ्यां नमः**' से सभी वस्तुओंका समर्पण कर पूजन किया जा सकता है। जिनका यज्ञोपवीत न हुआ हो, उन्हें वैदिक मन्त्रसे पूजन न करके केवल प्रणवरहित नाममन्त्रसे पूजन करना चाहिये।

शुद्धोदकस्नान—

गङ्गा च यमुना चैव गोदावरी सरस्वती । नर्मदा सिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम्॥
श्रीगणेशाम्बिकाभ्यां नमः, शुद्धोदकस्नानं समर्पयामि। (शुद्ध जलसे स्नान कराये।)
आचमन—शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

वस्त्र—

ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः।
तं धीरासः कवय उन्नयन्ति स्वाध्यो३ मनसा देवयन्तः॥
श्रीगणेशाम्बिकाभ्यां नमः, वस्त्रं समर्पयामि। (वस्त्र समर्पित करे।)
आचमन—वस्त्रान्ते आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

यज्ञोपवीत—

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥
यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि।
श्रीगणेशाम्बिकाभ्यां नमः, यज्ञोपवीतं समर्पयामि। (यज्ञोपवीत समर्पित करे।)
आचमन—यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

उपवस्त्र—

ॐ सुजातो ज्योतिषा सह शर्म वरूथमाऽसदत्स्वः। वासो अग्ने विश्वरूपꣳसं व्ययस्व विभावसो॥
श्रीगणेशाम्बिकाभ्यां नमः, उपवस्त्रं (उपवस्त्राभावे रक्तसूत्रम्) समर्पयामि। (उपवस्त्र समर्पित करे।)
आचमन—उपवस्त्रान्ते आचमनीयं जलं समर्पयामि। (आचमनके लिये जल दे।)

चन्दन—

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥
श्रीगणेशाम्बिकाभ्यां नमः, चन्दनानुलेपनं समर्पयामि। (चन्दन अर्पित करे।)

अक्षत—

अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः। मया निवेदिता भक्त्या गृहाण परमेश्वर॥
(अक्षत चढ़ाये।)

पुष्पमाला—

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो। मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥
श्रीगणेशाम्बिकाभ्यां नमः, पुष्पमालां समर्पयामि। (पुष्पमाला समर्पित करे।)

दूर्वा—

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि। एवा नो दूर्वे प्र तनु सहस्रेण शतेन च॥
श्रीगणेशाम्बिकाभ्यां नमः, दूर्वाङ्कुरान् समर्पयामि। (दूर्वांकुर चढ़ाये।)

सिन्दूर—

ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः॥

श्रीगणेशाम्बिकाभ्यां नमः, सिन्दूरं समर्पयामि। (सिन्दूर अर्पित करे।)

अबीर-गुलाल आदि नाना परिमल द्रव्य—

ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाꣳ सं परि पातु विश्वतः॥

श्रीगणेशाम्बिकाभ्यां नमः, नानापरिमलद्रव्याणि समर्पयामि। (अबीर आदि चढ़ाये।)

धूप—

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

श्रीगणेशाम्बिकाभ्यां नमः, धूपमाघ्रापयामि। (धूप दिखाये।)

दीप—

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥

श्रीगणेशाम्बिकाभ्यां नमः, दीपं दर्शयामि। (दीप दिखाये।)

हस्तप्रक्षालन—'ॐ हृषीकेशाय नमः' कहकर हाथ धो ले।

नैवेद्य—नैवेद्यको प्रोक्षित कर गन्ध-पुष्पसे आच्छादित करे। तदनन्तर जलसे चतुष्कोण घेरा लगाकर भगवान्‌के आगे रखे।

ॐ नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौःसमवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन्॥

श्रीगणेशाम्बिकाभ्यां नमः, नैवेद्यं निवेदयामि। (नैवेद्य निवेदित करे।)

नैवेद्यान्ते आचमनीयं जलं समर्पयामि। (जल समर्पित करे।)

ऋतुफल—

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳ हसः॥

श्रीगणेशाम्बिकाभ्यां नमः, ऋतुफलानि समर्पयामि। (ऋतुफल अर्पित करे।)

उत्तरापोशन—श्रीगणेशाम्बिकाभ्यां नमः। उत्तरापोशनार्थे जलं समर्पयामि। (जल दे।)

करोद्वर्तन—

ॐ अꣳशुना ते अꣳशुः पृच्यतां परुषा परुः। गन्धस्ते सोममवतु मदाय रसो अच्युतः॥

श्रीगणेशाम्बिकाभ्यां नमः, करोद्वर्तनार्थे चन्दनं समर्पयामि। (मलयचन्दन समर्पित करे।)

ताम्बूल—

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥

श्रीगणेशाम्बिकाभ्यां नमः, मुखवासार्थम् एलालवंगपूगीफलसहितं ताम्बूलं समर्पयामि। (इलायची, लौंग, सुपारीके साथ ताम्बूल अर्पित करे।)

दक्षिणा—

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

श्रीगणेशाम्बिकाभ्यां नमः, कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि। (द्रव्य-दक्षिणा समर्पित करे।)

आरती—

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्। आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

श्रीगणेशाम्बिकाभ्यां नमः, आरार्तिकं समर्पयामि। (कर्पूरसे आरती करे, आरतीके बाद जल गिरा दे।)

पुष्पांजलि—

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च। पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर॥

श्रीगणेशाम्बिकाभ्यां नमः, पुष्पाञ्जलिं समर्पयामि। (पुष्पांजलि अर्पित करे।)

प्रदक्षिणा—

यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिणा पदे पदे॥

श्रीगणेशाम्बिकाभ्यां नमः, प्रदक्षिणां समर्पयामि। (प्रदक्षिणा करे।)

विशेषार्घ—ताम्रपात्रमें जल, चन्दन, अक्षत, फल, फूल, दूर्वा और दक्षिणा रखकर अर्घपात्रको हाथमें लेकर निम्नलिखित मन्त्र पढ़े—

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक। भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥

द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो। वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद॥

अनेन सफलार्घेण वरदोऽस्तु सदा मम।

श्रीगणेशाम्बिकाभ्यां नमः, विशेषार्घं समर्पयामि। (विशेषार्घ दे।)

प्रार्थना—

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥
त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्तमेतत् त्वं वै प्रसन्ना भुवि मुक्तिहेतुः॥

श्रीगणेशाम्बिकाभ्यां नमः, प्रार्थनापूर्वकं नमस्कारान् समर्पयामि। (साष्टांग नमस्कार करे।)

गणेशपूजने कर्म यन्न्यूनमधिकं कृतम्। तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम॥

अनया पूजया गणेशाम्बिके प्रीयेताम्, न मम। (ऐसा कहकर समस्त पूजनकर्म भगवान्‌को समर्पित कर दे तथा पुनः नमस्कार करे।)

पुण्याहवाचन (बौधायनोक्त)

यजमान अपनी दाहिनी ओर यथाशक्ति चार ब्राह्मणोंको उत्तराभिमुख बैठा ले। पूजन-वरणके अनन्तर उनसे प्रार्थना करे—

यजमान—**भो ब्राह्मणाः करिष्यमाणवैतरणीगवीदानकर्मणि पुण्याहं भवन्तो ब्रुवन्तु।**

ब्राह्मण—**ॐ पुण्याहम्, ॐ पुण्याहम्, ॐ पुण्याहम्।**

यजमान—**भो ब्राह्मणाः करिष्यमाणवैतरणीगवीदानकर्मणि कल्याणं भवन्तो ब्रुवन्तु।**

ब्राह्मण—**ॐ कल्याणम्, ॐ कल्याणम्, ॐ कल्याणम्।**

यजमान—**भो ब्राह्मणाः करिष्यमाणवैतरणीगवीदानकर्मणि ऋद्धिं भवन्तो ब्रुवन्तु।**

ब्राह्मण—**ॐ कर्म ऋध्यताम्, ॐ कर्म ऋध्यताम्, ॐ कर्म ऋध्यताम्।**

यजमान—**भो ब्राह्मणाः करिष्यमाणवैतरणीगवीदानकर्मणि स्वस्ति भवन्तो ब्रुवन्तु।**

ब्राह्मण—**ॐ स्वस्ति, ॐ स्वस्ति, ॐ स्वस्ति।**

यजमान—**भो ब्राह्मणाः करिष्यमाणवैतरणीगवीदानकर्मणि श्रीरस्तु इति भवन्तो ब्रुवन्तु।**

ब्राह्मण—**ॐ अस्तु श्रीः, ॐ अस्तु श्रीः, ॐ अस्तु श्रीः।**

दक्षिणाका संकल्प—दाहिने हाथमें त्रिकुश, जल, अक्षत, पुष्प और द्रव्य लेकर ब्राह्मणोंको देनेके लिये संकल्प करे—

ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ कृतस्य सवत्सवैतरणीगवीदान-कर्माङ्गभूतबौधायनोक्तपुण्याहवाचनकर्मणः समृद्ध्यर्थं पुण्याहवाचकेभ्यो ब्राह्मणेभ्य इमां दक्षिणां विभज्य अहं सम्प्रददे।

ब्राह्मण बोलें—'**ॐ स्वस्ति।**'

विष्णुपूजा

शालग्रामपर* अथवा सुपारीपर आवाहन करके नाममन्त्रसे निम्न उपचारोंद्वारा विष्णुपूजन किया जा सकता है।

ध्यान—

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम्।
सहारवक्षःस्थलकौस्तुभश्रियं नमामि विष्णुं शिरसा चतुर्भुजम्॥

आवाहन—

आगच्छ भगवन् देव स्थाने चात्र स्थिरो भव।
यावत् पूजां करिष्यामि तावत् त्वं सन्निधौ भव॥

श्रीविष्णवे नमः, आवाहयामि, स्थापयामि, पूजयामि च।

आसन—**श्रीविष्णवे नमः, आसनार्थे पुष्पं समर्पयामि।** (आसनके लिये पुष्प दे।)

पाद्य—**श्रीविष्णवे नमः, पादयोः पाद्यं समर्पयामि।** (जल चढ़ाये।)

अर्घ—**श्रीविष्णवे नमः, हस्तयोरर्घं समर्पयामि।** (अर्घ-जल चढ़ाये।)

आचमन—**श्रीविष्णवे नमः, आचमनीयं जलं समर्पयामि।** (आचमन दे।)

पंचामृतस्नान—**श्रीविष्णवे नमः, पञ्चामृतस्नानं समर्पयामि, पञ्चामृतस्नानोत्तरं शुद्धोदकं स्नानमाचमनीयं च जलं समर्पयामि।** (पंचामृतस्नान करानेके बाद जलसे स्नान कराये और आचमन कराये।)

पीताम्बर—**श्रीविष्णवे नमः, वस्त्रोपवस्त्रं समर्पयामि।** (धोती, चादर चढ़ाये और आचमनीय जल दे।)

यज्ञोपवीत—**श्रीविष्णवे नमः, यज्ञोपवीतं समर्पयामि, यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि।** (यज्ञोपवीत तथा आचमनीय जल चढ़ाये।)

चन्दन—**श्रीविष्णवे नमः, चन्दनानुलेपनं समर्पयामि।** (चन्दन चढ़ाये।)

पुष्पादि—**श्रीविष्णवे नमः, पुष्पमालाम्, दूर्वाङ्कुरान् तुलसीदलानि नानापरिमलद्रव्याणि च समर्पयामि।** (पुष्पमाला, दूर्वांकुर, तुलसीदल तथा नाना परिमलद्रव्य चढ़ाये।)

धूप—**श्रीविष्णवे नमः, धूपमाघ्रापयामि।** (धूप आघ्रापित करे।)

दीप—**श्रीविष्णवे नमः, दीपं दर्शयामि।** (दीप दिखाकर हाथ धो ले।)

---

* शालग्रामपर आवाहनकी आवश्यकता नहीं है।

नैवेद्य— श्रीविष्णवे नमः, नैवेद्यमृतुफलं समर्पयामि, आचमनीयं जलं समर्पयामि। उत्तरापोशनार्थे जलं समर्पयामि। करोद्वर्तनार्थे चन्दनं समर्पयामि। (नैवेद्य,ऋतुफल,आचमनीय जल, उत्तरापोशनके लिये जल तथा चन्दन चढ़ाये।)

नमस्कार— श्रीविष्णवे नमः, नमस्कारान् समर्पयामि। (नमस्कार करे।)

प्रदक्षिणा— श्रीविष्णवे नमः, प्रदक्षिणां समर्पयामि। (प्रदक्षिणा करे)

पुष्पांजलि— श्रीविष्णवे नमः, पुष्पाञ्जलिं समर्पयामि। (पुष्पांजलि चढ़ाये।)

दक्षिणा— श्रीविष्णवे नमः, कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि। (द्रव्य-दक्षिणा समर्पित कर दे।)

ब्राह्मणवरण

यजमान अपनी दाहिनी ओर आसनपर ब्राह्मणको ससम्मान उत्तराभिमुख बैठाये और पूर्वाभिमुख स्वयं बैठ जाय। उसके बाद हाथमें जल, अक्षत, पुष्प तथा वरण-द्रव्य लेकर ब्राह्मणका वरण करे—

वरणसंकल्प— ॐ विष्णुर्विष्णुर्विष्णुः अद्य यथोक्तगुणविशिष्टतिथ्यादौ .....गोत्रः .....शर्मा/ वर्मा/गुप्तोऽहं (यदि प्रतिनिधि करे तो '**अहं**' के बाद **.....गोत्रस्य .....शर्मणः/वर्मणः/गुप्तस्योद्देश्येन**-ऐसा कहे)**करिष्यमाणसवत्सवैतरणीगवीदानकर्मणि गोप्रतिग्रहीतृत्वेन एभिर्वरणद्रव्यैः .....गोत्रं .....ब्राह्मणं भवन्तं वृणे।**

